विशिष्टा भवति, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताधिकरणे प्रमेये समवाय-सम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगिता-वच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, समवाय-सम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगिता-वच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगिता-वच्छेदकतायाः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया, प्रमेयत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धाव-च्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधि-करण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धा-वच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नप्रमेय-निष्ठावच्छेदकता लभ्यते । एवं याः याः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वै-तत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः ।

एवं या समवायसम्बन्धावच्छिन्ना शब्दतः अनुल्लिख्यमानघटत्वे वर्तमाना अवच्छेदकता साऽपि स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदका-नवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवेत्, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताधिकरणे प्रमेये समवायसम्बन्धावच्छिन्न-तादृशघटत्वनिष्ठावच्छेदकतायाः घटत्वरूपप्रमेये एव वर्तमानायाः वृत्तितया समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठा-वच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशघटत्वनिष्ठावच्छेदकतायां समवाय-सम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवाय-सम्बन्धावच्छिन्नायाः शब्दतः अनुल्लिख्यमानघटत्वे वर्तमानायाः तादृशाऽवच्छेदकतायाः धर्मविधया केनचिदपि अनवच्छिन्नतया समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकतायां समवायसम्बन्धा-वच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वाऽवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवाय-

सम्बन्धावच्छिन्ना शब्दतः अनुल्लिख्यमानघटत्वे वर्तमाना अवच्छेदकता धर्तुं शक्यते । एवं याः याः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानजातिषु वर्तमानाः स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः ।

इत्थञ्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समबायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानघटत्वादिजातिनिष्ठाः अवच्छेदकताश्चैव लभ्यन्ते, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानजातिनिष्ठावच्छेदकतासु चैव भवेत्, कालिकसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानजात्यादौ वर्तमानासु अवच्छेदकतासु वा नैव भवेदिति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवदभावीयप्रतियोगितायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानजातिनिष्ठावच्छेदकताश्च लभ्यन्ते, कालिकसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानघटत्वादिजातिनिष्ठाः अवच्छेदकताश्च नैव लभ्यन्ते । स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः अधिकरणविधयाऽपि समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नतादृशजातिनिष्ठावच्छेदकताश्चैव लभ्यन्ते ।

अतः यत्र यत्र (= समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु समवायसम्बन्धावच्छिन्नतादृशजातिनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एव ।

समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन अधिकरणविधया यथा समवाय-सम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नतादृशजातिनिष्ठावच्छेदकताश्च लभ्यन्ते तथैव स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधयाऽपि ताः एवाऽवच्छेदकताः (= समवायसम्बन्धा-वच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नतादृशजातिनिष्ठावच्छेदकताश्चैव) लभ्यन्ते, नान्या काऽपि अवच्छेदकता ।

या कालिकसम्बन्धावच्छिन्ना प्रमेयनिष्ठा अवच्छेदकता सा स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नप्रमेय-निष्ठसाध्यतावच्छेदकतायाः कालिकसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽ-वच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च कालिकसम्बन्धावच्छिन्नतादृशप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वसत्त्वात्, किन्तु स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा-वच्छेदकताविधया कालिकसम्बन्धावच्छिन्नतादृशप्रमेयनिष्ठावच्छेदकता नैव प्राप्यते, कालिकसम्बन्धे-नैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकता-वच्छेदकसमवायसम्बन्धावच्छिन्नत्वाऽसत्त्वादिति स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकान-वच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकता-विधया कालिकसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता नैव गृह्यते ।

एवं या अवच्छेदकता समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानघटत्वे वर्तमाना च भवेत् सा स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यता-वच्छेदकताविशिष्टा भवेत्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशघटत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्ना तादृशघटत्वनिष्ठावच्छेदकता समवाय-सम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा न भवति, समवायसम्बन्धावच्छिन्नायाः शब्दतः उल्लिख्यमानघटत्वे वर्तमानायाः अवच्छेदकतायाः घटत्वत्वेनाऽवच्छिन्नतया, समवायसम्बन्धा-वच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः प्रमेयत्वेनैवाऽवच्छिन्नतया घटत्वत्वेनाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरघटत्वत्वेनाऽवच्छिन्नायां समवाय-

सम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वविरहादिति स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानघटत्वे वर्तमाना च अवच्छेदकता नैव लभ्यते।

इत्थञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानजातिनिष्ठाः अवच्छेदकताश्चैव लभ्यन्ते इति स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानजातिनिष्ठावच्छेदकतासु चैव भवेत्, अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानजातिनिष्ठावच्छेदकताश्चैव लभ्यन्ते ।

स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशप्रमेयवदभावीयप्रतियोगितानिरूपितसमवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतावत्ता पूर्वोक्तरीत्या समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानजातिनिष्ठावच्छेदकतासु चैव भवेदिति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) प्रमेयवदभावीयप्रतियोगितायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानजातिनिष्ठावच्छेदकताश्चैव लभ्यन्ते ।

अतः यत्र यत्र (= समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नतादृशजातिनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवदभावीयप्रतियोगिता वर्तते एवेति यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-

स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रियतसम्बन्धेन) साध्यता वर्तते तदभावविधया तादृशप्रमेयवदभावः धर्तुं शक्यते, तदधिकरणे गुणादौ धूमहेतोरवृत्तितया लक्षणसमन्वयः एव स्यादिति ।

एवं यत्र यत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतानिरूपितावच्छेदकतावत्ता लभ्यते तत्रैव स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन साध्यतानिरूपितावच्छेदकतावत्ता यादृशस्थले लभ्यते तादृशस्थले साध्याभावमादाय लक्षणसमन्वयः एव स्यादिति नाऽसम्भवः दर्शयितुं युज्यते, किन्त्वव्याप्तिरेवेति अग्रेऽपि विभावनीयमिति ।

यदि व्याप्यताघटकसम्बन्धविधया स्वावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशः नाङ्गीक्रियते, किन्तु "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकता-

●

❋ આઠમા સંબંધ વિના આપત્તિ ❋

જો અષ્ટમ સંબંધને = साध्यताव्यापकतादिशामां व्याप्यताकोटिमां स्वअवच्छेदक-संबंधअवच्छिन्नत्वनी संबंधकोटिमांथी हकालपट्टी करी देवामां आवे तो पुनः **पर्वतो वह्निमान्, धूमात्** - आ स्थलमां व्याप्तिलक्षणनी अप्रसक्तिने = अव्याप्तिने अवकाश मळी जशे.

जो अष्टम संबंध काढी नांखवामां आवे तो लक्षण आ प्रमाणे थाय के -

स्वसामानाधिकरण्य-स्वअनवच्छेदकअनवच्छिन्नत्वउभयसंबंधथी जयां जयां साध्यता-अवच्छेदकता छे त्यां त्यां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदक-अनवच्छिन्नत्व - आ त्रण संबंधथी जे अभावीयप्रतियोगिताअवच्छेदकता होय,

वत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदा पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्न्यभावमादाय लक्षणसमन्वयो नैव सम्भवेत् ।

तद्यथा - स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाः अवच्छेदकताः एव लभ्यन्ते, किन्तु स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्ना या वह्नित्वनिष्ठाऽवच्छेदकता साऽपि समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेत्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठतादृशावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवासम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठतादृशावच्छेदकतायाश्च शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानतया धर्मविधया केनचिदपि अनवच्छिन्नतया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकसर्वधर्मानवच्छिन्नत्वस्य कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठ-

●

અને स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી જ્યાં જ્યાં જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી साध्यताअवच्छेदकता હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

पर्वतो वह्निमान् धूमात् - આ સ્થલમાં જો વહ્નિઅભાવ લેવો હોય તો તે વહ્નિઅભાવીયप्रतियोगिता साध्यताने समनियत હોવી જોઈએ. એટલે કે પૂર્વોક્ત લક્ષણ મુજબ (ઉપર જણાવેલ જે નૂતન લક્ષણ છે તે મુજબ) स्वसामानाधिकरण्य-स्वअनवच्छेदकअनवच्छिन्नत्व-ઉભયસંબંધથી જ્યાં જ્યાં साध्यताअवच्छेदकता છે ત્યાં ત્યાં स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી વહ્નિઅભાવીય-

तादृशावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया कालिकसम्बन्धावच्छिन्न-वह्नित्वनिष्ठतादृशावच्छेदकता धर्तुं शक्यते ।

तथा च स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु अपि भवेत्, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु अपि, कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लि-ख्यमानवह्नित्वे वर्तमानाः याः याः अवच्छेदकताः तासां सर्वासामपि स्वसामानाधिकरण्य-स्वानव-च्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टत्व-सम्भवादिति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छे-दकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठा-वच्छेदकताः अपि लभ्यन्ते, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः अपि लभ्यन्ते ।

तादृशवह्न्यभावीयप्रतियोगितानिरूपिता या समवायसम्बन्धावच्छिन्ना वह्नित्वनिष्ठावच्छेद-कता तया स्वसामानाधिकरण्यसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन कालिकसम्बन्धा-वच्छिन्नवह्नित्वनिष्ठावच्छेदकता विशिष्टा भवेत्, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायाः

प्रतियोगिताअवच्छेदकता होवी जोईએ.

तथा, જ્યાં જ્યાં स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदक-अनवच्छिन्नत्व - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી साध्यताअवच्छेदकता होवी जोईએ.

स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાના અધિકરણ તરીકે તો વહ્નિત્વવૃત્તિ, સમવાયસંબંધઅવચ્છિન્ન, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન અવચ્છેદકતા મળે તે વાત તો સ્પષ્ટ છે. તથા स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदक-अनवच्छिन्नत्व - આ ત્રણ સંબંધથી साध्यताअवच्छेदकताના અધિકરણ તરીકે પણ સમવાય-સંબંધઅવચ્છિન્ન, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન, વહ્નિત્વવૃત્તિ અવચ્છેદકતાઓ જ મળશે.

समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे वृत्तितया कालिक-सम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकता-सामानाधिकरण्यस्य सत्त्वात्, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायाः समवायसम्बन्धा-वच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाश्च शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानतया धर्मविधया केनचिदपि अनवच्छिन्नत्वेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकता-नवच्छेदकसर्वधर्मानवच्छिन्नत्वस्य कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायां सत्त्वाच्च, किन्तु स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगिता-वच्छेदकताविशिष्टावच्छेदकताविधया कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकता धर्तुं न शक्यते, कालिकसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धाव-च्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वाऽसत्त्वादिति स्व-सामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन सम-वायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया कालिक-

●

તેથી, જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદક-અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા છે - આ પ્રમાણે કહી શકાય છે.

પરંતુ, જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે - આવું કહી નહીં શકાય.

કારણ કે હમણાં જ જણાવ્યું તેમ સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાના અધિકરણ તરીકે માત્ર સમવાયસંબંધઅવચ્છિન્ન-વહ્નિત્વત્વભિન્નધર્મઅનવચ્છિન્ન-વહ્નિત્વવૃત્તિ-અવચ્છેદકતાઓ જ મળે. કિંતુ સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ બે સંબંધથી સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે તો નિરવચ્છિન્ન એવી વહ્નિત્વમાં રહેનારી તમામ અવચ્છેદકતાઓ મળી જશે, પછી તે સમવાયથી અવચ્છિન્ન હોય કે કાલિકથી અવચ્છિન્ન હોય.

सम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकता धर्तुं न शक्यते । एवं याः याः अवच्छेदकताः कालिकसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठ-प्रतियोगितावच्छेदकताविशिष्टाः नैव स्युः ।

तथा च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैत-त्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धा-वच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु एव स्यात्, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु नैव स्यात् । अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीय-प्रतियोगितायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः न लभ्यन्ते ।

ततश्च यत्र यत्र (= समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु कालिकसम्बन्धाव-च्छिन्नवह्नित्वनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्व-

●

⁂ संबंधनुं नियमन न रहेता अधिकरणोमां वृद्धि ⁂

मतलब के जे अवच्छेदकता

(१) वह्नित्वमां वृत्ति होय अने

(२) दुनियाना तमाम धर्मोथी अनवच्छिन्न होय ते अवच्छेदकता स्वसामानाधिकरण्य-स्वअनवच्छेदकअनवच्छिन्नत्व - आ बे संबंधथी साध्यताअवच्छेदकताना अधिकरण तरीके मळी जाय.

कालिकसंबंधअवच्छिन्न-शब्दतः अनुल्लिख्यमान एवा वह्नित्वमां रहेनारी अवच्छेदकता लईए तो ते अवच्छेदकता पण स्वसामानाधिकरण्य-स्वअनवच्छेदकअनवच्छिन्नत्व - आ बे संबंधथी साध्यताअवच्छेदकतानुं अधिकरण बनी जाय.

कारण के आ अवच्छेदकता पण

(१) वह्नित्वमां वृत्ति तो छे ज. अने

(२) दुनियाना तमाम धर्मोथी अनवच्छिन्न पण छे ज.

माटे, कालिकसंबंधअवच्छिन्न, दुनियाना तमाम धर्मथी अनवच्छिन्न, वह्नित्ववृत्ति

सामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) वह्न्यभावीयप्रतियोगिता नैव वर्तते, स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) वह्न्यभावीयप्रतियोगितायाः समवायसम्बन्धावच्छिन्नवह्नित्व-निष्ठावच्छेदकतासु वर्तमानत्वेऽपि कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु अवर्तमानत्वात्।

अतः "यत्र यत्र (= समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एव" - इति पूर्वोक्तरीत्या कथयितुं शक्यते, किन्तु "यत्र यत्र (= समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन

●

એવી અવચ્છેદકતા પણ સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ-સ્વસામાનાધિકરણ્ય - આ બે સંબંધથી સાધ્યતાઅવચ્છેદકતાનું અધિકરણ બને જ, જ્યારે સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધ-અવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતા-અવચ્છેદકતાનું અધિકરણ નહીં થાય.

માટે, જ્યાં જ્યાં (જેમ કે કાલિકસંબંધઅવચ્છિન્ન-નિરવચ્છિન્ન-વહ્નિત્વવૃત્તિ-અવચ્છેદકતાઓમાં) સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ બે સંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા રહેતી નથી.

✲ વહ્ન્યભાવ જ ગ્રાહ્ય ન રહેતા લક્ષણઅસમન્વય ✲

તેથી, સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી) જ્યાં જ્યાં સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિત-અવચ્છેદકતાવત્તાસંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતા છે - આવું કહી ન શકાય.

(अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता वर्तते" - इत्येवं कथयितुं न शक्यते ।

अतः यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावविधया वह्न्यभावः धर्तुं न शक्यते इति कथं तमादाय लक्षणसमन्वयः सम्भवेद् इति पर्वतो वह्निमान्, धूमाद् - इत्यत्राऽव्याप्तिः दुर्वारा एव ।

यदि स्वावच्छेदकसम्बन्धावच्छिन्नत्वं प्रवेश्य पूर्वोक्तं यथोक्तलक्षणमङ्गीक्रियते तदा पर्वतो वह्निमान् धूमाद् - इत्यत्र वह्न्यभावः धर्तुं शक्यते, यतः स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकता लभ्यते, किन्तु स्वसामानाधिकरण्य

ફલતઃ સાધ્યતાની વ્યાપ્યતા વહ્નિઅભાવીયપ્રતિયોગિતામાં રહેલી હોવા છતાં પણ સાધ્યતાની વ્યાપકતા વહ્નિઅભાવીયપ્રતિયોગિતામાં રહેલી ન હોવાથી સાધ્યતાસમનિયતપ્રતિયોગિતાનિરૂપક અભાવ તરીકે વહ્નિઅભાવ લઈ નહીં શકાય. પુનઃ **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં લક્ષણસમન્વયકારક વહ્નિઅભાવ દુર્લભ થઈ જતા લક્ષણસમન્વય પણ દુર્લભ થઈ જશે.

જો અષ્ટમ સંબંધનો પ્રવેશ કરાવવામાં આવે તો સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વસંબંધથી સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે તે જ અવચ્છેદકતા પકડાય કે જે અવચ્છેદકતા -

-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकता एव लभ्यते, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकता नैव लभ्यते, स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायाः समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टत्वेऽपि कालिकसम्बन्धेनैवाऽवच्छिन्नायां तादृश-वह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसम-वायसम्बन्धावच्छिन्नत्वाऽसम्भवेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन कालिकसम्बन्धावच्छिन्न-वह्नित्वनिष्ठावच्छेदकतायाः समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताऽविशिष्टत्वात् । ततश्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधयाऽपि समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः एव लभ्यन्ते, न कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठा-वच्छेदकताः अपि ।

तथा च यत्र यत्र (= समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु) स्वनिरूपिता-वच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व -स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्ता-

(१) वह्नित्वमां वृत्ति होय,
(२) समवायसंबंधथी अवच्छिन्न होय अने
(३) दुनियाना तमाम धर्मोथी अनवच्छिन्न होय.

कालिकसंबंधअवच्छिन्न, दुनियाना तमाम धर्मोथी अनवच्छिन्न, वह्नित्ववृत्ति एवी अवच्छेदकता

(१) वह्नित्वमां वृत्ति होवा छतां अने
(२) दुनियाना तमाम धर्मोथी अनवच्छिन्न होवा छतां पण
(३) समवायसंबंधथी अवच्छिन्न न होवाथी

स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी साध्यताअवच्छेदकताना अधिकरण तरीके ते अवच्छेदकता लई न शकाय.

स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व -

सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) वह्न्यभावीयप्रतियोगिता वर्तते, यत्र यत्र च (= समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एवेति तादृशवह्न्यभावः धर्तुं शक्यते, तदधिकरणे जलह्रदादौ धूमहेतोरवृत्तितया भवेदेव लक्षणसमन्वयः इति । तथा च उक्ताव्याप्तिनिवारणायाऽवश्यं कर्तव्यः स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धप्रवेशः ।

अत्रापि यदि स्वावच्छेदकसम्बन्धावच्छिन्नत्वाऽनिवेशे अव्याप्तिरेव बोद्धव्या, न असम्भवः, असम्भवात्, तथाविधस्थले लक्षणसमन्वयसम्भवात् ।

तथा हि - पर्वतः संयोगेन प्रमेयविशिष्टत्वे सति समवायेन प्रमेयविशिष्टत्वे सति स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टः तद्वान्, धूमात् - इत्यत्र संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति, यः तादात्म्येन प्रमेयविशिष्टस्तदभावमादाय लक्षणसमन्वयः सम्भवति, वह्निः संयोगेन तत्तत्परमाणु-पर्वत-तृणादिविशिष्टः, समवायेन वह्नित्वविशिष्टः, स्वरूपेण कालिकादिना वह्नित्वादिविशिष्टः तत्तदभावविशिष्टश्च, तादात्म्येन स्वविशिष्टः इति धूमसत्त्वे वह्निसत्त्वाऽवश्यम्भावात् संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति, यः तादात्म्येन प्रमेयविशिष्टः सः स्यादेवेति सत्स्थलमिदम् ।

●

આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે માત્ર સમવાયસંબંધઅવચ્છિન્ન-વહ્નિત્વવૃત્તિ-વહ્નિત્વત્વઅતિરિક્તધર્મઅનવચ્છિન્ન-અવચ્છેદકતા જ લઈ શકાશે: આ અવચ્છેદકતાને લઈને લક્ષણસમન્વય પૂર્વવત્ સમજી લેવો.

આ રીતે, **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં કાલિકસંબંધઅવચ્છિન્ન, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન, વહ્નિત્વવૃત્તિ એવી અવચ્છેદકતાને લઈને આવતી અવ્યાપ્તિ દૂર કરવા માટે *દ્વિતીય સંબંધનો = प्रतियोगिताव्यापकत्वदिशामां व्याप्यतावटक स्वअवच्छेदकसंबंध*-અવચ્છિન્નત્વનો પ્રવેશ કરાવવો જરૂરી છે.

प्रकृते या संयोगसम्बन्धावच्छिन्ना प्रमेयनिष्ठा अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च संयोगसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवत्येव, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकता-धिकरणे प्रमेये संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाः वृत्तितया संयोगसम्बन्धाव-च्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, संयोगसम्बन्धेनैव अवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां संयोगसम्बन्धावच्छिन्नप्रमेय-निष्ठसाध्यतावच्छेदकतावच्छेदकसंयोगसम्बन्धावच्छिन्नत्वसत्त्वात्, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठ-साध्यतावच्छेदकतायाः संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाश्च प्रमेयत्वेनैवाऽ-वच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकता-वच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया संयोगसम्बन्धा-वच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः संयोगसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवन्ति इति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु स्यात् ।

या समवायसम्बन्धावच्छिन्ना प्रमेयनिष्ठा च अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकता-धिकरणे प्रमेये समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्न-

प्रमेयनिष्ठावच्छेदकतायाः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः समवायसम्बन्धेनाऽवच्छिन्नाः प्रमेयनिष्ठाः च भवेयुः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवन्ति, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवेत् । या

या स्वरूपसम्बन्धावच्छिन्ना प्रमेयनिष्ठा च अवच्छेदकता सा स्वसामानाधिकरण्य- शो
सम्बन्धेनाऽपि, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेनाऽपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनाऽपि ल
च स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, स्वरूपसम्बन्धावच्छिन्नप्रमेय- ता
निष्ठसाध्यतावच्छेदकताधिकरणे प्रमेये स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाः वृत्तितया स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां सत्त्वात्, स्वरूपसम्बन्धेनैवाऽवच्छिन्नायां प्रमेयनिष्ठतादृशावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वसत्त्वात्, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः स्वरूपसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः

अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वरूपसम्बन्धा-वच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वा-नवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवेत् ।

या तादात्म्यसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च तादात्म्यसम्बन्धावच्छिन्न-प्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेत्, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकता-धिकरणे प्रमेये तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया तादात्म्यसम्बन्धाव-च्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठा-वच्छेदकतायां सत्त्वात्, तादात्म्यसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां तादात्म्य-सम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वसत्त्वात्, तादात्म्य-सम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया, प्रमेयत्वेतरेणाऽनवच्छिन्नतया च तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशा-वच्छेदकतायां तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छि-न्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैत-त्त्रितयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः तादात्म्यसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाः च भवेयुः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवन्ति, अर्थात् स्वसामाना-धिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादात्म्यसम्बन्धा-वच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवेत् ।

इत्थञ्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैत-त्त्रितयसम्बन्धेन साध्यतानिरूपिता या संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता

संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु वर्तते, या समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु वर्तते, या स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु वर्तते, या तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च वर्तते इति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः अधिकरणविधया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्च लभ्यन्ते ।

संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टस्तदभावीयप्रतियोगितानिरूपिता या संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तया संयोगसम्बन्धावच्छिन्ना प्रमेयनिष्ठा च अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च विशिष्टा भवेत्, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताधिकरणे प्रमेये संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां सत्त्वात्, संयोगसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसंयोगसम्बन्धावच्छिन्नत्वसत्त्वात्, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतायाः संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता एव लभ्यते ।

एवं याः याः अवच्छेदकताः संयोगसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन

य शो ल ता

संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावत्ता संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु एव भवेत् ।

एवं समवायसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताधिकरणे प्रमेये समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतायाः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवेत् ।

या स्वरूपसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता सा स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताधिकरणे प्रमेये स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठ-

प्रतियोगितावच्छेदकतासामानाधिकरण्यस्य स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, स्वरूपसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठ-प्रतियोगितावच्छेदकतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वसत्त्वात्, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठ-प्रतियोगितावच्छेदकतायाः स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाश्च प्रमेयत्वेनैवाऽ-वच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायां स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया स्वरूपसम्बन्धा-वच्छिन्नप्रमेयनिष्ठावच्छेदकता धर्तुं शक्यते ।

एवं याः याः अवच्छेदकताः स्वरूपसम्बन्धावच्छिन्नाः (कालिकादीनां सम्बन्धानां स्वरूपे एवाऽन्तर्भावात् कालिकादिसम्बन्धावच्छिन्नावच्छेदकता अपि अत्र समावेश्याः) प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वै-तत्त्रितयसम्बन्धेन स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन स्वरूप-सम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावत्ता स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवति । य शो ल ता

या तादात्म्यसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च तादात्म्यसम्बन्धाव-च्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियो-गितावच्छेदकताधिकरणे प्रमेये तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया तादात्म्य-सम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य तादात्म्यसम्बन्धावच्छिन्न-प्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, तादात्म्यसम्बन्धेनैवाऽवच्छिन्नायां प्रमेयनिष्ठावच्छेदकतायां तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वसत्त्वात्, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतायाः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठा-वच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च तादात्म्यसम्बन्धावच्छिन्न-

प्रमेयनिष्ठप्रतियोगितावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवत्येव ।

एवं याः याः अवच्छेदकताः तादात्म्यसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः स्युरेव, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतावत्ता तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु स्यादेव।

इत्थञ्च संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टस्तदभावीयप्रतियोगितानिरूपिता या संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तद्वत्ता संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु वर्तते, या समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु वर्तते, या स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु भवेत्, या तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता तद्वत्ता तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च वर्तते इति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशाभावनिरूपितप्रतियोगितायाः अधिकरणविधया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्च लभ्यन्ते ।

तथा च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः, संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टस्तदभावीयप्रतियोगितायाश्चाधिकरणविधया संयोगसम्बन्धावच्छिन्नप्रमेय-

निष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्च लभ्यन्ते ।

अतो यत्र यत्र (= संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टः तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एवेति कथयितुं शक्यते ।

स्वनिरूपितावच्छेदकतावत्ताघटकावच्छेदकतावत्ता यदि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन विवक्ष्यते तदापि स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन साध्यतायाः अधिकरणविधया ताः एवाऽवच्छेदकताः लभ्यन्ते । तथा हि - य शो ल ता

या संयोगसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता सा तु स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवतीति स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवत्येव ।

या समवायसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता साऽपि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेदेव, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताधिकरणे प्रमेये समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठतादृशावच्छेदकतायाः वृत्तितया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वाच्च ।

एवं याः याः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः स्युरेव, अर्थात् स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु अपि स्यात् ।

एवं या स्वरूपसम्बन्धावच्छिन्ना प्रमेयनिष्ठा च अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताधिकरणे प्रमेये स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया प्रमेयत्वेतरेणाऽनवच्छिन्नतया च स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता लभ्यते । एवं याः याः अवच्छेदकताः स्वरूपसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुः ।

एवं या अवच्छेदकता तादात्म्यसम्बन्धावच्छिन्ना प्रमेयनिष्ठा च स्यात् सा स्वसामानाधिकरण्यसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताधिकरणे प्रमेये तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाः वृत्तितया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायाश्च प्रमेयत्वेनैवाऽवच्छिन्नतया, प्रमेयत्वेतरधर्मानवच्छिन्नत्वाच्च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वेतरधर्मानवच्छिन्नत्वस्य तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां सत्त्वाच्चेति

स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति । एवं याः याः अवच्छेदकताः तादात्म्यसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुः ।

इत्थञ्च स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च वर्तते । तथा च या अवच्छेदकता प्रमेयत्वेतरधर्मैरनवच्छिन्ना भवेत् सा यत्र कुत्रापि वर्तमाना भवतु येन केन वा सम्बन्धेनाऽवच्छिन्ना भवतु तथापि स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेदेव ।

एवं संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्च ताः एव स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाः तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टाश्चापि भवन्ति। अर्थात् स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता, स्वरूपसम्बन्धेनावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावत्ता च संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च भवेयुरिति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्चैव लभ्यन्ते ।

तथा च न हि तादृशी काऽपि अवच्छेदकता या स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया लभ्यते, किन्तु तादृशस्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः अधिकरणविधया न लभ्यते ।

संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टस्तदभावीयप्रतियोगितायाः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) अधिकरणविधया च पूर्वोक्तरीत्या संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताश्चैव लभ्यन्ते ।

तथा च यत्र यत्र (= संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति तादात्म्येन यः प्रमेयविशिष्टः तदभावीयप्रतियोगिता स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) वर्तते एव।

यत्र यत्र च (= संयोगसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, स्वरूपसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, तादात्म्यसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) संयोगेन प्रमेयविशिष्टत्वे सति, समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टः तदभावीयप्रतियोगिता वर्तते तत्र तत्र पूर्वोक्तरीत्या स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकान-

वच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एव । तथा च संयोगेन प्रमेयविशिष्टत्वे सति समवायेन प्रमेयविशिष्टत्वे सति, स्वरूपेण प्रमेयविशिष्टत्वे सति यः तादात्म्येन प्रमेयविशिष्टस्तदभावः धर्तुं शक्यते इति तदधिकरणे धूमहेतोरवृत्तितया लक्षणसमन्वयः स्यादेवेति न असम्भवः प्रदर्शयितुं युक्तः, किन्तु अव्याप्तिरेवोपदर्शनीया इति । एवञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशप्रयोजनमुपदर्शितम् ।

यदि हि स्वानवच्छेदकानवच्छिन्नत्वं न प्रवेश्यते, अपि तु "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवं लक्षणमभ्युपगम्यते तदा 'पर्वतो वह्निमान् धूमाद्' - इत्यत्र वह्न्यभावमादाय लक्षणसमन्वयः न सम्भवति ।

●

❀ नवमा संबंध विना मुश्केलीने नोंतरा ❀

हवे नवम संबंधनो = साध्यताव्यापकत्वदिशामां व्याप्यताघटक स्वअनवच्छेदक-अनवच्छिन्नत्वनो संबंधकोटिमां प्रवेश न करावो तो **पर्वतो वह्निमान् धूमात्** - आ स्थलमां केवी रीते सावच्छिन्न-वह्नित्ववृत्ति-समवायसंबंधअवच्छिन्न-अवच्छेदकताने लईने अव्याप्ति आवे छे ? ते जोईओ.

नवम संबंध विनानुं लक्षण आ प्रमाणे थाय -

जयां जयां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्वउभयसंबंधथी साध्यता-अवच्छेदकता छे त्यां त्यां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदक-अनवच्छिन्नत्व - आ त्राण संबंधथी जे अभावीयप्रतियोगिताअवच्छेदकता होय तथा जयां जयां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व -

तद्यथा - समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन अधिकरणविधया समवायसम्बन्धावच्छिन्नाः, शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाश्चावच्छेदकताः लभ्यन्ते । या समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना चावच्छेदकता भवेत् सा स्वसामानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वाच्च, किन्तु स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकतावविधया समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकता धर्तुं न शक्यते, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायाः समवायसम्बन्धावच्छिन्नायाः तादृशावच्छेदकतायाः

●

આ ત્રણ સંબંધથી જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતા-અવચ્છેદકતા હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

આ લક્ષણ મુજબ જો **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં વહ્નિઅભાવને લઈને લક્ષણ સમન્વય કરવો હોય તો (૧) જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વઉભયસંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા રહેવી જોઈએ.

(૨) તથા જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા રહેવી જોઈએ.

દ્વિતીય વ્યાપ્તિ તો પૂર્વવત્ બરાબર જ છે. પ્રથમ વ્યાપ્તિ વિચારીએ -

वह्नित्वत्वेनाऽवच्छिन्नतया, शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानायाः अत एव धर्मविधया केनचिदपि अनवच्छिन्नायाः समवायसम्बन्धावच्छिन्नायाः साध्यतावच्छेदकतायाः वह्नित्वत्वेनाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकवह्नित्वत्वेनाऽवच्छिन्नायां समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतानवच्छेकानवच्छिन्नत्वविरहादिति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता नैव लभ्यते ।

य शो ल ता

किन्तु यदि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धस्य प्रवेशः नाङ्गीक्रियते तदा स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्ना, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना

●

જે અવચ્છેદકતા

(૧) વહ્નિત્વમાં વૃત્તિ હોય અને

(૨) સમવાયસંબંધથી અવચ્છિન્ન હોય તે અવચ્છેદકતા

(૧) સ્વસામાનાધિકરણ્ય,

(૨) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ - આ બે સંબંધથી સાધ્યતાઅવચ્છેદકતાથી વિશિષ્ટ થઈ જાય = સાધ્યતાઅવચ્છેદકતાનું અધિકરણ થઈ જાય.

❋ અવચ્છેદકનું બંધન ન રહેતા અવચ્છેદકતાઓની સંખ્યાવૃદ્ધિ ❋

વિ ન મ્રા

શબ્દતઃ ઉલ્લિખ્યમાન વહ્નિત્વવૃત્તિ, સમવાયસંબંધઅવચ્છિન્ન અવચ્છેદકતા પણ ઉક્ત બે શરતમાંથી પાસ થઈ શકે છે. એટલે કે આ અવચ્છેદકતા

(૧) વહ્નિત્વમાં વૃત્તિ પણ છે અને,

(૨) સમવાયસંબંધથી અવચ્છિન્ન પણ છે.

માટે, આ અવચ્છેદકતા

(૧) સ્વસામાનાધિકરણ્ય,

(૨) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ - આ બે સંબંધથી સાધ્યતાઅવચ્છેદકતાનું અધિકરણ થઈ જાય.

च अवच्छेदकता लभ्यते एव, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि स्यात्, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि स्यात् । अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

य शो ल ता

समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतया समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च विशिष्टा भवति, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवाय-

(१) स्वसामानाधिकरण्य,

(२) स्वअवच्छेदकसंबंधअवच्छिन्नत्व,

(३) स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी वह्निअभावीयप्रतियोगिताअवच्छेदकताना अधिकरण तरीके आ अवच्छेदकता न आवी शके.

કારણ કે જે અવચ્છેદકતા

(१) वह्नित्वमां वृत्ति होय,

(२) समवायसंबंधथी अवच्छिन्न होय अने

वि

(३) दुनियाना तमाम धर्मोथी अनवच्छिन्न होय ते अवच्छेदकता ज स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी वह्निअभावीयप्रतियोगिताअवच्छेदकताना अधिकरण तरीके मळी शके.

ण

भा

शब्दतः उल्लिख्यमान वह्नित्ववृत्ति समवायसंबंधअवच्छिन्न अवच्छेदकता

(१) वह्नित्वमां वृत्ति होवा छतां पण अने

(२) समवायसंबंधथी अवच्छिन्न होवा छतां पण

(३) वह्नित्वत्वधर्मथी अवच्छिन्न छे. एटले के दुनियाना तमाम धर्मोथी अनवच्छिन्न नथी.

सम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृश-वह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैव अवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वाच्च, किन्तु स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन तादृशवह्नित्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदकता समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा न भवति, समवायसम्बन्धावच्छिन्नायाः, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायाः अवच्छेदकतायाः वह्नित्वत्वेनाऽवच्छिन्नतया, शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानायाः अत एव धर्मविधया केनचिदपि अनवच्छिन्नायाः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतायाः वह्नित्वत्वेनाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नायां शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायां तादृशावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतानवच्छेदकानवच्छिन्नत्वाऽसत्त्वादिति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकता न लभ्यते, किन्तु समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः एव लभ्यन्ते, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु समवायसम्बन्धावच्छिन्नाव-

●

માટે, આ અવચ્છેદકતા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાના અધિકરણ તરીકે લઈ નહીં શકાય.

આનો સીધો અર્થ એ જ નીકળે કે -

જ્યાં જ્યાં (જેમ કે શબ્દતઃ ઉલ્લિખ્યમાન વહ્નિત્વવૃત્તિ-સમવાયસંબંધઅવચ્છિન્નઅવચ્છેદકતાઓમાં) સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વઉભયસંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ- આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા નથી.

❋ सामनैयत्य टकी न शकता वह्निसाध्यक स्थळे आपत्ति ❋

આથી, જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાના-

च्छेदकतासु एव भवेत्, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु समवायसम्बन्धावच्छिन्नावच्छेदकतासु नैव भवेत् । तथा च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावाधिकरण-विधया शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः समवायसम्बन्धावच्छिन्नाऽवच्छेदकताः एव लभ्यन्ते, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः समवायसम्बन्धावच्छिन्नाः चावच्छेदकताः नैव लभ्यन्ते ।

यदि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन साध्यतावच्छेदकतायाः तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतायाश्चाधिकरणविधया समानाः समसङ्ख्याकाः एवाऽवच्छेदकताः लभ्यन्ते, किन्तु साध्यतावच्छेदकतायाः अधिकरणं स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन विवक्ष्यते, तादृशवह्न्यभावीय-प्रतियोगितावच्छेदकताधिकरणं स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन विवक्ष्यते तदा साध्यतावच्छेदकताधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः अधिकाः लभ्यन्ते, न हि एताः उक्तत्रितयसम्बन्धेन वह्न्यभावीयप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया प्राप्यन्ते, अत एव वैषम्यमापतति इत्यभिसन्धिः प्रकृते ।

तथा च यत्र यत्र (= शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु समवायसम्बन्धावच्छिन्नावच्छेदकतासु, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु समवायसम्बन्धावच्छिन्नावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदक-

●

धिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्वઉભયસંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિત-અવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધ-અવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) વહ્નિઅભાવીયપ્રતિયોગિતા રહેતી નથી - આવું ફલિત થઈ જશે.

સ્પષ્ટ અર્થ એ જ કે,

સાધ્યતાની વ્યાપ્યતા વહ્નિઅભાવીયપ્રતિયોગિતામાં રહેલી હોવા છતાં પણ સાધ્યતાની વ્યાપકતા વહ્નિઅભાવીયપ્રતિયોગતામાં રહેલી નથી. માટે, સાધ્યતાસમનિયતપ્રતિયોગિતા-નિરૂપક અભાવ તરીકે વહ્નિઅભાવ લઈ નહીં શકાય. તો પછી **पर्वतो वह्निमान् धूमात्** -

सम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता नैव वर्तते ।

अतः "यत्र यत्र (= शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु समवायसम्बन्धावच्छिन्नावच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिताऽस्ति तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एवे"ति पूर्वोक्तरीत्या कथयितुं शक्यते, तथापि "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता अस्ति, तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता

य शो ल ता

●

આ સ્થલમાં કયા અભાવને લઈને લક્ષણસમન્વય કરશો ? લક્ષણસમન્વયકારક અભાવનો છપ્પનીયો દુકાળ તમારા લક્ષણમાં વર્તાશે.

❋ संबंधना प्रवेशथी आपत्ति रवाना ❋

જો સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વનો લક્ષણમાં પ્રવેશ કરાવી દો તો જે અવચ્છેદકતા,

(૧) વહ્નિત્વમાં વૃત્તિ હોય,

(૨) સમવાયસંબંધથી અવચ્છિન્ન હોય અને

(૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન હોય તે જ અવચ્છેદકતા

વિ ન ા્રા

(૧) સ્વસામાનાધિકરણ્ય,

(૨) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ અને

(૩) સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતાનું અધિકરણ થાય.

वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तदभावविधया वह्न्यभावः धर्तुं न शक्यते इति कथं तमादाय लक्षणसमन्वयः ? एवं पर्वतो वह्निमान् धूमात् - इत्यत्र लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः । स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धप्रवेशे च पूर्वोक्तरीत्या उभयत्र समानाधिकरणानामेव प्राप्तेः नाऽव्याप्तिरिति स्वयं विभावनीयम् ।

अत्रापि अव्याप्तिरेव प्रदर्शनीया, न तु असम्भवः, सर्वत्र लक्षणाऽसमन्वयाऽभावात्, 'पर्वतः वह्नित्ववद्वान्, धूमात्' - इत्येतत्स्थले वह्नित्वविशिष्टाभावमादाय लक्षणसमन्वयसम्भवात्। तथा हि - यत्र यत्र धूमः तत्र तत्र वह्नित्वविशिष्टः वर्तते एव, वह्नेरेव वह्नित्वविशिष्टत्वादिति 'पर्वतः वह्नित्ववद्वान्, धूमात्' - इत्येतत् सत्स्थलम् । प्रकृते हि वह्नित्वविशिष्टाभावः

●

તમે જે અવચ્છેદકતા લીધી છે તે

(૧) વહ્નિત્વમાં વૃત્તિ પણ છે અને

(૨) સમવાયસંબંધથી અવચ્છિન્ન પણ છે. છતાં તે અવચ્છેદકતા

(૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન ન હોવાથી

(૧) સ્વસામાનાધિકરણ્ય,

(૨) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ અને

(૩) સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે લઈ નહીં શકાય.

માત્ર જે અવચ્છેદકતાઓ

(૧) વહ્નિત્વમાં વૃત્તિ હશે,

(૨) સમવાયસંબંધથી અવચ્છિન્ન હશે અને

(૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન હશે તે જ અવચ્છેદકતાઓ

(૧) સ્વસામાનાધિકરણ્ય,

(૨) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ,

(૩) સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે લઈ શકાશે. આ અવચ્છેદકતાને લઈને લક્ષણસમન્વય પૂર્વવત્ સમજી લેવો.

धर्तुमिष्यते ।

साध्यतानिरूपिताऽवच्छेदकता प्रकृते एका एव, शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना समवायसम्बन्धावच्छिन्ना चावच्छेदकता । या शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमाना समवाय-सम्बन्धावच्छिन्ना चावच्छेदकता भवेत् सा स्वसामानाधिकरण्यसम्बन्धेनाऽपि, स्वावच्छेदक-सम्बन्धावच्छिन्नत्वसम्बन्धेनाऽपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनाऽपि च समवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेत्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यता-वच्छेदकताधिकरणे वह्नित्वे एव समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठतादृशावच्छेदकतायाः वर्तमानतया शब्दतः अनुल्लिख्यमानवह्नित्ववृत्तिसमवायसम्बन्धावच्छिन्नतादृशावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य सत्त्वात्, समवाय-सम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठ-साध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठ-साध्यतावच्छेदकतायाः वह्नित्वत्वेनाऽवच्छिन्नतया समवायसम्बन्धावच्छिन्नायाः शब्दतः अनुल्लि-ख्यमानवह्नित्वे वर्तमानायाः अवच्छेदकतायाः धर्मविधया केनचिदपि अनवच्छिन्नतया च समवाय-सम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यता-वच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वाऽवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वाव-च्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्ना शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता धर्तुं शक्यते, एवं याः याः अवच्छेदकताः *समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाश्च स्युः ताः सर्वाः अपि* स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वसामानाधिक-रण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धा-वच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमान-वह्नित्वे वर्तमानासु चावच्छेदकतासु स्यादेव ।

या शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना समवायसम्बन्धावच्छिन्ना च अवच्छेदकता

साऽपि स्वसामानाधिकरण्यसम्बन्धेनाऽपि, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेनाऽपि, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनाऽपि च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावि-शिष्टा भवेत्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नतादृश-वह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिक-रण्यस्य सत्त्वात्, समवायसम्बन्धेनैव अवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, सम-वायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्य-तावच्छेदकतायाश्च वह्नित्वत्वेनैव अवच्छिन्नतया वह्नित्वत्वेतरेणाऽनवच्छिन्नतया च समवाय-सम्बन्धावच्छिन्नायां शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायामवच्छेदकतायां समवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य
-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्न-
वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्ना शब्दतः उल्लि-
ख्यमानवह्नित्वे वर्तमाना चावच्छेदकता धर्तुं शक्यते । एवं याः याः अवच्छेदकताः समवाय-
सम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदक-
सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्व-
निष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुरेव । अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छि-
न्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यताव-
च्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु
भवेत् ।

इत्थञ्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैत-त्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धा-वच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि भवेत्, समवाय-सम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि भवेत् । तथा च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वाव-च्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः अधिकरण-

विधया समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

तादृशवह्नित्वविशिष्टाभावीयप्रतियोगितानिरूपिताऽवच्छेदकता एका एव - समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वनिष्ठा अवच्छेदकता । या समवायसम्बन्धावच्छिन्ना शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वर्तमानतया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नायाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानायाः अवच्छेदकतायाः धर्मविधया केनचिदपि अनवच्छिन्नतया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वत्वेतरसर्वधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायामवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकता धर्तुं शक्यते । एवं याः याः अवच्छेदकताः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः समवायसम्बन्धावच्छिन्नाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः भवेयुः, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु चावच्छेदकतासु भवेत् ।

या शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना समवायसम्बन्धावच्छिन्ना चाऽवच्छेदकता स्यात् सा स्वसामानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदका-

नवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवेत्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नायाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायाः अवच्छेदकतायाः समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाश्च वह्नित्वत्वेनैवाऽवच्छिन्नतया वह्नित्वत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वसत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना चावच्छेदकता धर्तुं शक्यते । एवं याः याः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाश्च ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः स्युः । अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि भवेत्, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु अपि भवेत् । तथा च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टाभावीयप्रतियोगितायाः अधिकरणविधयाऽपि समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्चैव लभ्यन्ते ।

अतः यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेद-

कतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टाभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यताऽपि वर्तते एव ।

यथा स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते, तथैव स्वसामानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः अपि लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च अपि लभ्यन्ते । न हि तादृशी काऽपि अवच्छेदकता या स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा न भवेत्, स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेत्। अर्थात् स्वसामानाधिकरण्यसम्बन्धेन वह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा अवच्छेदकता प्रकृते स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनाऽपि विशिष्टा भवत्येव । अतः स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया याः याः अवच्छेदकताः लभ्यन्ते ताः ताः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टाः अपि भवेयुः, ता एव च भवेयुः ।

तथा च यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन

(अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वै-तत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टाभावीयप्रतियोगिता वर्तते एव । अतः यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धा-वच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेद-कतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैत्त्रितय-सम्बन्धेन यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छे-दकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन साध्यता वर्तते एव, तदभावविधया वह्नित्वविशिष्टाभावो धर्तुं शक्यते, तदधिकरणे जलह्रदादौ धूमहेतोर-वृत्तितया लक्षणसमन्वयः स्यादेवेति कथं तत्राऽव्याप्तिः सम्भवति ? अतः असम्भवोऽपि असम्भवितः एव इत्येवमसम्भवाऽसम्भवं स्वानवच्छेदकाऽनवच्छिन्नत्वाऽप्रवेशे ***केचन उपपादयन्ति*** ।

य शो ल ता

वस्तुतस्तु 'पर्वतो वह्नित्ववद्वान् धूमाद्' - इत्यत्र वह्नित्वविशिष्टाभावमादाय, स्वानवच्छेदकानव-च्छिन्नत्वसम्बन्धाऽप्रवेशे, लक्षणसमन्वयो नैव सम्भवति, यतः स्वसामानाधिकरण्य-स्वावच्छेदकसम्ब-न्धावच्छिन्नत्वोभयसम्बन्धेन यानि यावन्ति चाधिकरणानि साध्यतावच्छेदकतायाः प्राप्यन्ते न हि तानि तावन्ति चाधिकरणानि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदका-नवच्छिन्नत्वैतत्त्रितयसम्बन्धेन प्राप्यन्ते, समवायसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चावच्छेदकता स्वसा-मानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्व-निष्ठसाध्यतावच्छेदकताविशिष्टा भवति, वह्नित्वस्य प्रमेयतया प्रमेयवृत्ति-समवायसम्बन्धावच्छिन्न-तादृशावच्छेदकतायाः समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्न-प्रमेयनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताव-च्छेदकसमवायसम्बन्धावच्छिन्नत्वस्य समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशप्रमेयनिष्ठावच्छेद-कतायां सत्त्वाच्च । किन्तु इयं समवायसम्बन्धावच्छिन्ना प्रमेयनिष्ठा चाऽवच्छेदकता स्वसामाना-धिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यताव-च्छेदकताविशिष्टा न भवति, यतः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकता प्रमेयत्वेनाऽ-वच्छिन्ना, प्रमेयत्वं न समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकम्,

समवायसम्बन्धावच्छिन्नतादृशावच्छेदकतायाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानतया केनचिदपि धर्मेणाऽनवच्छिन्नत्वात् । तथा च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकप्रमेयत्वावच्छिन्नायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकानवच्छिन्नत्वं कथं स्यात् ?

ततश्च समवायसम्बन्धावच्छिन्नाः प्रमेयनिष्ठाः अवच्छेदकताः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन साध्यतावच्छेदकतायाः अधिकरणविधया प्राप्यन्ते, किन्तु स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन अधिकरणविधया नैव प्राप्यन्ते । वह्नित्ववदभावीयप्रतियोगितावच्छेदकता प्रकृते साध्यतावच्छेदकतासमाना एवेति यथा स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः न लभ्यन्ते तथैव तादृशवह्नित्ववदभावीयसमवायसम्बन्धावच्छिन्नवह्नित्ववृत्तिप्रतियोगितावच्छेदकतायाः अधिकरणविधया अपि नैव लभ्यन्ते । ततश्च स्पष्टमिदं यदुत स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन यानि यावन्ति चाधिकरणानि साध्यतावच्छेदकतायाः प्राप्यन्ते न हि तानि तावन्ति चैवाधिकरणानि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशवह्न्यभावीयप्रतियोगितावच्छेदकतायाः लभ्यन्ते ।

ततश्च यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्ववदभावीयप्रतियोगिता नैव वर्तते इति कथं वह्नित्ववदभावो धर्तुं शक्यते ? तद्ग्रहणाऽसम्भवे लक्षणसमन्वयाऽसम्भवोऽपि ध्रुवः ।

एवं पर्वतः प्रमेयवद्वान् धूमाद् - इत्यत्रापि प्रमेयवदभावमादाय लक्षणसमन्वयो नैव सम्भवति स्वानवच्छेदकानवच्छिन्नत्वाऽप्रवेशे, यतः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन अधिकरणविधया घट-घटत्वादौ कुत्रचिदपि वर्तमानाः प्रमेयत्वेतराऽनवच्छिन्नाः

समवायसम्बन्धावच्छिन्नाश्चावच्छेदकताः पूर्वोक्तरीत्या प्राप्यन्ते, सर्वेषां प्रमेयत्वेन यत्र कुत्रचिदपि वर्तमानाऽवच्छेदकतायाः स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टत्वसम्भवात् । किन्तु समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानघटत्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेत्, किन्तु स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन विशिष्टा न भवेत्, समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताधिकरणप्रमेये घटत्वादिरूपे वर्तमानसमवायसम्बन्धावच्छिन्नतादृशावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यसम्भवेऽपि समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशघटत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसम्भवेऽपि च समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतावच्छेदकप्रमेयत्वभिन्नघटत्वत्वधर्मावच्छिन्नायां समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतानवच्छेदकाऽनवच्छिन्नत्वाऽसम्भवात् । तथा च समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकतायाः स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताऽविशिष्टत्वात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकाऽनवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकताविशिष्टावच्छेदकतायां समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकता नैव प्राप्यते, प्राप्यते च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तादृशसाध्यतावच्छेदकतायां एवाधिकरणविधया ।

प्रकृते प्रमेयवदभावीयप्रतियोगितावच्छेदकता समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठसाध्यतावच्छेदकतासमानैवेति यथा स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन साध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नतादृशघटत्वनिष्ठावच्छेदकता लभ्यते तथैव तादृशसमवायसम्बन्धावच्छिन्नप्रमेयनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधयाऽपि प्राप्यते । स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकतायाः तादृशप्रमेयवदभावीयप्रतियोगितावच्छेदकतायाः च अधिकरणविधया तु ताः नैव प्राप्यन्ते इति स्पष्टमेव यदुत न हि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन तादृशप्रमेयवदभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतायाः वा

यानि यावन्ति चाधिकरणानि प्राप्यन्ते तानि तावन्ति चैव स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकतायाः तादृशप्रमेयवद-भावीयप्रतियोगितावच्छेदकतायाः वा अधिकरणविधया प्राप्यन्ते ।

ततश्च यत्र यत्र (= समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छि-न्नासु शब्दतः उल्लिख्यमानघटत्वादिनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकाऽनवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवद-भावीयप्रतियोगिता वर्तते एवेति न । तथा च तादृशप्रमेयवदभावः एव धर्तुं न शक्यते, ततः कुतः तमादाय लक्षणसमन्वयः सम्भवेत् ?

एवञ्चैतादृशस्थलेषु लक्षणसमन्वयो नैव सम्भवति इति असम्भव एवाऽऽपादयितुं युक्तः ।

तथापि यदा प्रमेयं साध्यतावच्छेदकतावच्छेदकं भवेत्, अर्थात् 'पर्वतः प्रमेयवद्वह्निमान्, धूमाद्' - इत्यत्र प्रमेयवद्वदभावमादाय लक्षणसमन्वयः सम्भवेत्, स्वानवच्छेदकानवच्छिन्नत्वाऽ-प्रवेशेऽपि । तद्यथा - वह्निः वह्नित्वत्वलक्षणप्रमेयविशिष्टवह्नित्वविशिष्टः अस्त्येवेति यत्र धूमः तत्र प्रमेयवद्वान् अवश्यं स्यादेवेति सत्स्थलमिदम् ।

प्रकृते साध्यतावच्छेदकता एकविधैव - समवायसम्बन्धावच्छिन्ना प्रमेयवन्निष्ठा अवच्छेदकता। या समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वा-वच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धाव-च्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टा भवति ।

तद्यथा - (१) समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया प्रमेयवत् प्राप्यते, तथा च या या अवच्छेदकता प्रमेयवन्निष्ठा भवेत् सा स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टा भवेत् । समवायसम्बन्धावच्छिन्न-प्रमेयवन्निष्ठाभिप्रेतावच्छेदकता प्रमेयवति एव वर्तमाना इति साऽवच्छेदकता स्वसामानाधिकरण्य-सम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टा स्यादेव ।

(२) समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकतावच्छेदकसम्बन्धविधया समवायः प्राप्यते इति समवायसम्बन्धावच्छिन्नाः सर्वाः अपि अवच्छेदकताः स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टाः भवेयुरेव । इयमपि समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकता समवायसम्बन्धेनैवाऽवच्छिन्ना इति साध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात् समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेनाऽपि समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टा भवत्येव ।

(३) समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकतावच्छेदकधर्मविधया प्रमेयं प्राप्यते । विश्वे चाखिलमपि वस्तु प्रमेयमेवेति येन केनचिदपि अवच्छिन्नाऽवच्छेदकता प्रमेयाऽवच्छिन्ना एव कथ्यते । अर्थाद् घटत्वत्वेनाऽवच्छिन्ना केनचिदपि अनवच्छिन्ना वा अवच्छेदकता स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टा भवेदेव । गृहीतसमवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकताऽपि प्रमेयेनैव अवच्छिन्ना इति स्वानवच्छेदकाऽनवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताधिकरणविधया समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकता लभ्यते एव।

य शो ल ता

न च साध्यतावच्छेदकतावच्छेदकविधया प्रमेयप्राप्तौ साध्यतावच्छेदकतानवच्छेदकाऽप्रसिद्धिः, सर्वेषां प्रमेयत्वेन प्रमेयभेदाऽप्रसिद्धेरिति अप्रसिद्धिनिबन्धनो दोषो दुर्निवारः, घटकाऽप्रसिद्ध्या घटिताऽप्रसिद्धे***रिति वाच्यम्***,

साध्यतावच्छेदकतावच्छेदकत्वेनैव भेदस्याऽभिप्रेततया, प्रमेयत्वेनाऽनभिप्रेततया च सम्बन्धविधया साध्यतावच्छेदकतावच्छेदकानां धर्मविधया साध्यतावच्छेदकतावच्छेदकत्वाऽसम्भवेन साध्यतावच्छेदकतानवच्छेदकतया ग्राह्यत्वात्, तेषां प्रमेयत्वेऽपि सम्बन्धविधयैव साध्यतावच्छेदकतावच्छेदकत्वात् ।

न च सम्बन्धविधया साध्यतावच्छेदकतावच्छेदकानामपि प्रमेयतया साध्यतावच्छेदकतावच्छेदकधर्मविधया प्राप्तप्रमेयराश्यन्तर्गततया साध्यतावच्छेदकतावच्छेदकत्वमेव तेषा***मिति वाच्यम्,***

तथापि सम्बन्धविधया साध्यतावच्छेदकतानवच्छेदकान् साध्यतावच्छेदकतानवच्छेदकतया गृहीत्वा लक्षणसमन्वयसम्भवात्, धर्मविधया साध्यतावच्छेदकतावच्छेदकविधया प्रमेयप्राप्त्या

तद्भिन्नतया कस्याऽपि प्राप्त्यसम्भवेऽपि सम्बन्धविधया साध्यतावच्छेदकतावच्छेदकसम्बन्धविधया समवायस्यैव प्राप्त्या तद्भिन्नानां साध्यतावच्छेदकतानवच्छेदकत्वसम्भवात् । अत एव धर्मविधया सम्बन्धविधया वा साध्यतावच्छेदकताऽनवच्छेदकानुल्लेखे एव श्रेयः इति सूक्ष्मधिया भावनीयम् । अलमधिकविस्तरेण ।

तथा च याः अवच्छेदकताः प्रमेयवति वर्तमानाः स्युः, समवायसम्बन्धेनाऽवच्छिन्नाश्च स्युः ताः सर्वाः अपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टाः स्युरेव, धर्मविधया सा घटत्वत्वेनाऽवच्छिन्ना भवतु, प्रमेयत्वेनाऽवच्छिन्ना भवतु, केनचिदपि अनवच्छिन्ना वा भवतु ।

यथा साध्यतावच्छेदकता (१) समवायसम्बन्धावच्छिन्ना, (२) प्रमेयवति वर्तमाना (३) प्रमेयावच्छिन्ना च तथैव प्रमेयवद्वदभावीयप्रतियोगितावच्छेदकताऽपि (१) समवायसम्बन्धावच्छिन्ना, (२) प्रमेयवति वर्तमाना, (३) प्रमेयाऽवच्छिन्ना चेति यथा साध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन अधिकरणविधया समवायसम्बन्धावच्छिन्नाः प्रमेयवन्निष्ठाश्चावच्छेदकताः लभ्यन्ते तथैव स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशप्रमेयवद्वदभावीयप्रतियोगितावच्छेदकतायाः अधिकरणविधयाऽपि ताः एव समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकताः लभ्यन्ते । य शो ल ता

सर्वेषामवच्छेदकतानामवच्छेदकविधया प्रमेयस्यैव प्राप्त्या सर्वाः हि अवच्छेदकताः स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकताविशिष्टाः भवन्त्येवेति समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठसाध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनापि अधिकरणविधया ता एव समवायसम्बन्धावच्छिन्नाः प्रमेयवन्निष्ठाः अवच्छेदकताः लभ्यन्ते ।

ततश्च यत्र यत्र (= समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकतासु) स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन साध्यतावच्छेदकता वर्तते तत्र तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशप्रमेयवद्-

वदभावीयप्रतियोगितावच्छेदकता वर्तते एवेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकतावत्ता, तादृशप्रमेयवद्वदभावीयप्रतियोगितावच्छेदकतावत्ता, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनाऽपि साध्यतावच्छेदकतावत्ता तादृशप्रमेयवद्वदभावीयप्रतियोगितावच्छेदकतावत्ता च समवाय-सम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकतासु स्यादेव ।

ततश्च यत्र यत्र (= समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकतासु) स्वनिरूपिता-वच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवद्वदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपिताऽवच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एव, यत्र यत्र च (= समवायसम्बन्धावच्छिन्नप्रमेयवन्निष्ठावच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशप्रमेयवद्वदभावीयप्रतियोगिता वर्तते एव । तथा च तादृशः प्रमेयवद्वदभावः धर्तुं शक्यते । तदधिकरणे च धूमहेतुरवश्यमवृत्तिः इति लक्षणसमन्वयसम्भवान्नात्राऽव्याप्तिः सम्भवति । कुत्रचिदपि लक्षणसमन्वयसम्भवेऽसम्भवोऽसम्भवित एव स्यात् । अत एव ग्रन्थकृता यदव्याप्तिः उपदर्शिता तत् सम्यगेव । ततश्च स्वानवच्छेदकानवच्छिन्नत्वप्रवेशप्रयोजनमपि उपदर्शितम् ।

अथ व्यापकताघटकसंसर्गे स्वसामानाधिकरण्यं न प्रवेश्यते, किन्तु "यत्र यत्र स्वनिरूपिता-वच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्ता-

※ व्याप्यताकोटिमां त्रणे संबंधो आवश्यक ※

આ રીતે, **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં સાવચ્છિન્ન-વહ્નિત્વવૃત્તિ-અવચ્છેદકતાને = શબ્દતઃ ઉલ્લિખ્યમાન વહ્નિત્વવૃત્તિ = સમવાયસંબંધઅવચ્છિન્ન અવચ્છેદકતાને લઈને વ્યાપ્તિલક્ષણની અપ્રસક્તિને = અવ્યાપ્તિને દૂર કરવા માટે, નવમ સંબંધનો =

सम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपिताऽवच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदा ***यद्यपि*** पूर्वोक्ता पर्वतो वह्निमान् धूमात् - इत्यत्रापि वह्न्यभावमादाय लक्षणसमन्वयाऽसम्भवरूपाऽऽपत्तिः न सम्भवति, यतः स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च तादृशवह्न्यभावीयप्रतियोगितानिरूपितसमवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानघटत्वे वर्तमानाः अवच्छेदकताः च प्राप्यन्ते, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्न-तादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः

●

साध्यताव्यापकत्वदिशामां व्याप्यताकोटिमां स्वअनवच्छेदकअनवच्छिन्नत्वनो प्रवेश करावको જરૂરી छे.

આ રીતે, આપણે साध्यताव्यापकत्वदिशामां व्याप्यताघटक संबंध तरीके स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्राणे संबंधना प्रवेशनुं प्रयोजन जोई गया.

જો આમાંથી કોઈ એકાદનો પણ પ્રવેશ ન કરાવો તો **पर्वतो वह्निमान् धूमात्** - આ પ્રાથમિક સ્થલમાં જ તમારું લક્ષણ નાપાસ થઈ જાય છે.

★ व्यापकताघटकसंबंधकोटिमां प्रविष्टसंबंधप्रयोजन ★

હવે, साध्यताव्यापकत्वदिशामां व्यापकताघटकसंबंधकोटिमां રહેલા દરેક સંબંધનું પ્રયોજન પીછાણીએ -

જો साध्यताव्यापकत्वदिशामां व्यापकताघटक संबंधोमां स्वसामानाधिकरण्यनो = दसमा संबंधनो प्रवेश न करावो तो '**तार्णवह्निरयम्**' - **इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात्** - આ स्थलमां वह्निअभावने लईने अव्याप्ति आवशे.

अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः एव लभ्यन्ते, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठतादृशप्रतियोगितावच्छेदकतायाः अधिकरणविधयाऽपि समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः एव लभ्यन्ते इति प्रागुपदर्शितमेव। तथा च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु भवेत्, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु एव भवेत्, स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता च समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानघटत्वे वर्तमानासु अवच्छेदकतासु चैव भवेत्, अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्य-

य शो ल ता

●

દસમા સંબંધ વિનાનું લક્ષણ આ પ્રમાણે થશે -

(૧) સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી જ્યાં જ્યાં (અભિપ્રેત) જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા હોય અને

वि ना म्रा

(૨) જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ બે સંબંધથી જે અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ.

તાર્ણવહ્નિસાધ્યક ઉક્તસ્થલમાં જો વહ્નિઅભાવ લેવો હોય તો,

(૧) જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદક-

मानवह्नित्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते, स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगितायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः एव लभ्यन्ते, स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगितायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानघटत्वादिजातौ वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

ततश्च यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते एव इति कथयितुं शक्यते एव ।

यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-

●

અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા હોવી જોઈએ. અને

(૨) જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદક-અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વઅવચ્છેદકસંબંધ-અવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ બે સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતા-અવચ્છેદકતા હોવી જોઈએ.

स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता वर्तते एवेति वह्न्यभावः धर्तुं शक्यते, तदधिकरणे च धूमहेतोरवृत्तितया लक्षणसमन्वयः एव स्यादिति नास्ति पूर्वोक्ताऽव्याप्तिः ।

किन्तु यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु

●

અવચ્છિન્ન હોય અને (૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન હોય - તે જ અવચ્છેદકતા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનું અધિકરણ થાય.

સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતાનું અધિકરણ બનનારી (૧) સમવાયસંબંધઅવચ્છિન્ન, વહ્નિત્વવૃત્તિ, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન એવી અવચ્છેદકતાઓ, (૨) સમવાય-સંબંધઅવચ્છિન્ન, વહ્નિત્વવૃત્તિ, વહ્નિત્વત્વ સિવાયના દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન - એવી અવચ્છેદકતાઓ - આ બે પ્રકારની અવચ્છેદકતામાંથી માત્ર પ્રથમ પ્રકારની જ અવચ્છેદકતા

(૧) વહ્નિત્વમાં વૃત્તિ પણ છે,

(૨) સમવાયસંબંધથી અવચ્છિન્ન પણ છે અને

(૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન પણ છે. માટે, તે જ અવચ્છેદકતામાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા રહી શકે.

જે દ્વિતીય પ્રકારની અવચ્છેદકતા છે તે

(૧) વહ્નિત્વમાં વૃત્તિ હોવા છતાં પણ અને

(૨) સમવાયસંબંધથી અવચ્છિન્ન હોવા છતાં પણ

(૩) દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન ન હોવાથી (કારણ કે તે વહ્નિત્વત્વથી અવચ્છિન્ન છે, શબ્દતઃ ઉલ્લિખ્યમાન વહ્નિત્વમાં રહેલી છે તેથી જસ્તો !) સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિ-

च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धा-वच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्न्यभावीयप्रतियोगिता नैव वर्तते, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु स्वसामाना-धिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्ब-न्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः वर्तमानत्वेऽपि समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वेऽवर्तमानत्वादिति तादृशवह्न्यभावः धर्तुं न शक्यते ।

किन्तु समवायेन वह्नित्वविशिष्टस्याऽभावः एव धर्तव्यः, तादृशाभावीयप्रतियोगितानिरूपिता अवच्छेदकता एका एव - समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता । समवायसम्बन्धावच्छिन्ना शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेनाऽपि, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेनाऽपि, स्वानवच्छेदका-

●

અભાવીયપ્રતિયોગિતાઅવચ્છેદકતાનું અધિકરણ નહીં થાય.

માટે, જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદક-અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા છે - આવું કહી શકાતું હોવા છતાં પણ

જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદક-અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતાઅવચ્છેદકતા છે ત્યાં ત્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી વહ્નિ-અભાવીયપ્રતિયોગિતાઅવચ્છેદકતા છે - આવું કહી શકાતું ન હોવાથી

જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (બધે અવચ્છેદકતાવત્તા સ્વસામાના-ધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી લેવી) વહ્નિઅભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી સાધ્યતા છે - આવું કહી શકાશે. પરંતુ, જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી વહ્નિઅભાવીયપ્રતિયોગિતા છે - આવું કહી નહીં શકાય.

नवच्छिन्नत्वसम्बन्धेनाऽपि च समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकता-विशिष्टा भवेत्, समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नतादृश-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठा-वच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, सम-वायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानायाः अत एव धर्मविधया केनचिदपि अनवच्छिन्नायाः वह्नित्वत्वेनाऽपि अनवच्छिन्नतया समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वस्य समवाय-सम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायामवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छे-दकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्व-निष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमान-वह्नित्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते एव ।

एवं या समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता साऽपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवत्येव, समवाय-

આ રીતે, સાધ્યતાની વ્યાપ્યતા વહ્નિઅભાવીયપ્રતિયોગિતામાં રહેલી હોવા છતાં સાધ્યતાની વ્યાપકતા વહ્નિઅભાવીયપ્રતિયોગિતામાં રહેલી ન હોવાથી સાધ્યતાસમનિયત-પ્રતિયોગિતાનિરૂપકઅભાવ તરીકે વહ્નિઅભાવ લઈ નહીં શકાય. કિંતુ, વહ્નિત્વવિશિષ્ટનો અભાવ જ લેવો પડશે.

❋ वह्नित्वविशिष्टअभाव જ ગ્રાહ્ય ❋

स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - આ ત્રણ સંબંધથી ઉક્તવહ્નિત્વવિશિષ્ટઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતાના અધિકરણ તરીકે તે જ મળશે કે જે સાધ્યતાઅવચ્છેદકતાના અધિકરણ તરીકે મળે છે. કારણ કે જેવી રીતે સાધ્યતાઅવચ્છેદકતા

(૧) વહ્નિત્વમાં વૃત્તિ છે,

(૨) સમવાયસંબંધથી અવચ્છિન્ન છે અને

सम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृश-वह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकता-सामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवाय-सम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठ-प्रतियोगितावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नतादृश-वह्नित्वनिष्ठावच्छेदकतायाः समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाश्च शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानायाः वह्नित्वत्वेनैवाऽवच्छिन्नतया वह्नित्वत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मा-नवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामाना-धिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवाय-सम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते एव ।

पूर्वोक्तरीत्या समवायसम्बन्धावच्छिन्ना शब्दतोऽनुल्लिख्यमानघटत्वे वर्तमाना अवच्छेदकता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धा-वच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, किन्तु स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा न भवतीति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धाव-च्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतो-ऽनुल्लिख्यमानघटत्वे वर्तमानाः अवच्छेदकताः न लभ्यन्ते एव।

(૩) વહ્નિત્વત્વ સિવાયના દુનિયાના તમામ ધર્મથી અનવચ્છિન્ન છે.

તેવી રીતે ઉક્તવહ્નિત્વવિશિષ્ટઅભાવીયપ્રતિયોગિતાઅવચ્છેદકતા પણ

(૧) વહ્નિત્વમાં વૃત્તિ છે,

(૨) સમવાયસંબંધથી અવચ્છિન્ન છે અને

(૩) વહ્નિત્વત્વઅતિરિક્ત ધર્મથી અનવચ્છિન્ન છે.

બારમા સંબંધથી લક્ષણસમન્વય, અવ્યાપ્તિ દૂર

આ રીતે, બન્ને અવચ્છેદકતાના અધિકરણો સરખે સરખા થઈ જવાથી "જ્યાં જ્યાં સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ

एवं कालिकसम्बन्धावच्छिन्ना शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, किन्तु स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा न भवतीति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः नैव लभ्यन्ते ।

एवं समवायसम्बन्धावच्छिन्ना प्रमेये वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा भवति, किन्तु स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टा न भवतीति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टावच्छेदकताविधया समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः नैव लभ्यन्ते । य शो ल ता

तथा च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु चैव स्यादिति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टवह्न्यभावीयप्रतियोगितायाः अधिकरणविधया

संबंधथी वह्नित्वविशिष्टअभावीयप्रतियोगिताअवच्छेदकता छे त्यां त्यां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी साध्यताअवच्छेदकता छे ज अने जयां जयां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी साध्यताअवच्छेदकता छे त्यां त्यां स्वसामानाधिकरण्य-स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदकअनवच्छिन्नत्व - आ त्रण संबंधथी वह्नित्वविशिष्टअभावीयप्रतियोगिताअवच्छेदकता पण छे ज" - आवुं कही शकाशे. वि न भा

समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः चैव लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानघटत्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः समवायसम्बन्धावच्छिन्नप्रमेयनिष्ठावच्छेदकताः वा नैव लभ्यन्ते ।

अतो यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टवह्न्यभावीयप्रतियोगिताऽपि वर्तते एव, यत्र यत्र च (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशवह्नित्वविशिष्टवह्न्यभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) तादृशसाध्यता वर्तते एवेति वह्नित्वविशिष्टवह्न्यभावः एव ग्राह्यः, 'अयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञाने तु समवायेन वह्नित्वविशिष्टवह्निः विषयतया भासते इति तादृशवह्नित्वविशिष्टवह्न्यभावाधिकरणविधया 'अयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं न लभ्यते,

●

તેથી, જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (બધે અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી વહ્નિત્વવિશિષ્ટઅભાવીયપ્રતિયોગિતા છે જ. અને જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી વહ્નિત્વવિશિષ્ટઅભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી વહ્નિત્વવિશિષ્ટનિષ્ઠસાધ્યતા છે જ - આ રીતે કહી શકાશે.

किन्त्वन्यदेव, तत्र च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न भवेदेव अव्याप्तिः । तथा च 'अयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन समवायेन यः वह्नित्वविशिष्टः तद्वत्, तज्ज्ञानत्वात् - इत्यत्र वह्न्यभावमादायाऽव्याप्तिवारणाय स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धोऽपि अवश्यं प्रवेशनीयः इति सम्बन्धद्वादशीकृत्यम् ।

प्रकृते तत्तत्सम्बन्धप्रयोजनप्रदर्शनावसरे तत्तत्स्थलग्रहणमेव किमर्थं कृतम् ? किम् अन्यादृशस्थले अन्यत्सम्बन्धप्रयोजनप्रदर्शनावसरे प्रदर्शितस्थले वा अव्याप्तिः न सम्भवति ? येनाऽन्यस्थलोपादानसार्थक्योपपत्तिः इत्यादिकं स्वयं विभावनीयम्, अतिविस्तरभयान्नेहोच्यते ***इति दिक्*** ।

●

આ પ્રમાણે સાધ્યતાની વ્યાપ્યતા + વ્યાપકતા - બન્ને વહ્નિત્વવિશિષ્ટઅભાવીયપ્રતિયોગિતામાં રહેલ હોવાથી સાધ્યતાસમનિયતપ્રતિયોગિતાનિરૂપકઅભાવ તરીકે વહ્નિત્વવિશિષ્ટઅભાવ લઈ શકાશે. તેનું અધિકરણ તજ્જ્ઞાનભિન્ન જ્ઞાન. કારણ કે તજ્જ્ઞાનમાં વહ્નિત્વવિશિષ્ટ પોતે વિષય બનતો હોવાથી ત્યાં વિષયિતાસંબંધથી તેનો અભાવ કેવી રીતે રહે ? તજ્જ્ઞાનત્વ હેતુ ત્યાં અવૃત્તિ હોવાથી લક્ષણસમન્વય થઈ જશે. અવ્યાપ્તિ દૂર - દૂર.....

આ રીતે, **'वह्निरयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन समवायेन वह्नित्वविशिष्टवत्, तज्ज्ञानत्वात्** - આ સ્થલમાં વહ્નિઅભાવને લઈને આવતી અવ્યાપ્તિ દૂર કરવા માટે બારમા સંબંધનો = સાધ્યતાવ્યાપકત્વદિશામાં વ્યાપકતાઘટકસંબંધકોટિમાં સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વનો પ્રવેશ કરાવવો અનિવાર્ય છે.

❋ કેટલાંક મૂંઝવતા/ઉદ્ભવતા પ્રશ્નો ❋

આ રીતે બારે સંબંધોનું પદકૃત્ય પૂર્ણ થયું. અહીં અવાંતર ઘણાં પ્રશ્નો ઊઠી શકે છે. જેવા કે -

(૧) વિષયિતાસંબંધથી સાધ્ય કેમ લીધાં ?

(૨) વિષયિતાસંબંધથી પણ તે તે સાધ્ય લેવા જ જરૂરી છે ? બીજા સાધ્ય લઈને પદકૃત્ય દર્શાવી નથી શકાતું ?

(૩) પૂર્વેના ત્રણ સંબંધમાં જે ઘટત્વનિષ્ઠઅવચ્છેદકતા વગેરે ત્રણ પ્રકારની અવચ્છેદકતાને લઈને અવ્યાપ્તિ આપી તે જ અવ્યાપ્તિ ઉત્તરના ત્રણ સંબંધમાં શું નથી આવતી કે જેથી નવી અવ્યાપ્તિ દર્શાવી ?

(૪) પૂર્વેના ત્રણ સંબંધમાં ક્રમશઃ એક એક સંબંધ કાઢો તો **पर्वतो वह्निमान् धूमात्** - આ સ્થલમાં મહાનસીયવહ્નિઅભાવ લઈને કે બીજા અભાવ લઈને અવ્યાપ્તિ નથી આપી શકાતી ? કે જેથી 'વહ્નિઅભાવ લક્ષણ ઘટક ન બને. માટે, અવ્યાપ્તિ આવે' - આવું જણાવવું પડે.

(૫) સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ કેમ ? સ્વઅવચ્છેદકઅવચ્છિન્નત્વ કેમ નહીં ?

(૬) સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ કેમ ? સ્વઅનવચ્છેદકસંબંધઅનવચ્છિન્નત્વ કેમ નહીં ?

(૭) એક - એક સંબંધ કાઢીને આ દોષો દર્શાવ્યા. પણ, ઘટત્વનિષ્ઠઅવચ્છેદકતા વગેરે લઈને જે આપત્તિ આપી હતી તે તો, બે સંબંધ જો લક્ષણમાંથી કાઢી નાંખો તો, ન આવે તેવી છે. તો પછી તે વખતે અન્ય કોઈ સ્થલમાં અવ્યાપ્તિ આવે ? મતલબ કે બે - ત્રણ વગેરે સંબંધ કાઢીએ તો કઈ - કઈ અવ્યાપ્તિઓ આવે ?

આ બધાં પ્રશ્નોના જવાબ અમારે આપવાની હવે જરૂરત નથી. કારણ કે અનેક વાર પૂર્વે આવા પ્રકારના પ્રશ્નોના જવાબ અમે આપી દીધા છે. અહીં જે ૧૨ રીતે/૯ રીતે અવ્યાપ્તિ દર્શાવી છે તે રીતે જ અવ્યાપ્તિ દર્શાવવી પડે તેમ છે. માટે, તમને જો પ્રશ્ન ઉઠે કે વિષયિતાસંબંધથી કેમ સાધ્ય દર્શાવ્યું ? તો તમારે વિષયિતાસંબંધ વિનાનું સાધ્ય બનાવી જોવાનું કે 'અવ્યાપ્તિ આવે છે કે નહીં ?' નહીં જ આવે. આ રીતે સ્વયં જ દરેક પ્રશ્નના જવાબ તમે મેળવી શકશો.

તથા આ એક - એક સંબંધ કાઢીને અવ્યાપ્તિ દર્શાવી છે. બે - ત્રણ સંબંધ કાઢો તો તો આ જ અવ્યાપ્તિઓ પુનઃ પુનઃ ટકરાશે. તમે જ ચેક કરજો. આ ૧૨માંથી કોઈ એકાદ રીતે તો અવ્યાપ્તિ આવી જ જશે ! અને હા ! આ બારમાંથી એક સંબંધ કાઢો, બે કાઢો..... ઈત્યાદિ રીતે ભાંગા બનાવવા જશો તો તો કુલ ૪૦૯૬ ભાંગા થશે.

પૂર્વે જણાવેલી પદ્ધતિ મુજબ ૪૦૯૬ ભાંગાનું ગણિત સમજી લેવું. જે ભાંગામાં ૧૨ એ ૧૨ સંબંધો હશે તે જ ભાંગો નિર્દોષ. બાકી બધાં ભાંગામાં પૂર્વોક્ત રીતે જ ૧૨માંથી કોઈ એકાદ રીતે અવ્યાપ્તિ આવે, આવે અને આવે જ છૂટકો. આ રીતે, આપણું નિરૂપણ પૂર્ણ થવાને આરે છે. આ નવા લક્ષણની *'હાઈલાઈટ્સ'* સંક્ષેપમાં જોઈ લઈએ -

❁ નવા લક્ષણની 'શોર્ટ સમરી' ❁

મૂળ લક્ષણ -

(ક) જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા [1]સ્વસા-

માનાધિકરણ્ય-[૨]સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-[૩]સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) જે અભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા [૪]સ્વસામાનાધિકરણ્ય-[૫]સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-[૬]સ્વઅનવચ્છેદક-અનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી સાધ્યતા હોય. તથા

(ખ) જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા [૭]સ્વસામા-નાધિકરણ્ય-[૮]સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-[૯]સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા [૧૦]સ્વસામાનાધિકરણ્ય-[૧૧]સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-[૧૨]સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) જે અભાવીયપ્રતિયોગિતા હોય તે અભાવના અધિકરણમાં અવૃત્તિત્વ. આ છે નિર્દોષ લક્ષણ !

✱ દરેક સંબંધના પ્રયોજનની ટૂંકનોંધ ✱

હવે ક્રમવાર પદકૃત્યની હાઈલાઈટ્સ --

જ્યાં પણ 'ત્રિતયસંબંધથી' એમ લખ્યું હોય ત્યાં 'સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદક-સંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી' - આ પ્રમાણે સમજવું.

વિ

ન

ભા

સૌ પ્રથમ **प्रतियोगिताव्यापकत्वदिशामां व्याप्यतावटक कोटिमां** -

(૧) પ્રથમસંબંધનો પ્રવેશ ન કરાવવામાં આવે તો લક્ષણ આ પ્રમાણે થાય -

(ક) જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વઅવચ્છેદક-સંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી) જે અભાવીયપ્રતિયોગિતા છે..... ઈત્યાદિ લક્ષણ પૂર્વવત્.

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં ઘટત્વનિષ્ઠ, સમવાયસંબંધઅવચ્છિન્ન, દુનિયાના તમામ ધર્મથી અનવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ.

(૨) જો દ્વિતીય સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા-સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી) જે અભાવીયપ્રતિયોગિતા છે..... ઈત્યાદિ પૂર્વવત્.

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં કાલિકસંબંધઅવચ્છિન્ન, વહ્નિત્વનિષ્ઠ, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ.

(૩) જો તૃતીય સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વઉભયસંબંધથી) જે અભાવીયપ્રતિયોગિતા છે..... ઈત્યાદિ લક્ષણ પૂર્વવત્.

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં વહ્નિત્વવૃત્તિ, સમવાયસંબંધઅવચ્છિન્ન, દુનિયાના એકાદ ધર્મથી અવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ !

વ્યાપકતાઘટક કોટિમાં --

(૪) જો ચતુર્થ સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા ત્રણ સંબંધથી) જે અભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભય-સંબંધથી) સાધ્યતા હોય..... ઈત્યાદિ લક્ષણ પૂર્વવત્.

વિ

દોષ :- 'वह्निरयम्' - इत्येतज्ज्ञानं विषयितासम्बन्धेन वह्निमत्, तज्ज्ञानत्वात् - આ સ્થલમાં

ના તાર્ણવહ્નિઅભાવને લઈને અવ્યાપ્તિ !

પ્રા (૫) જો પંચમ સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા ત્રણ સંબંધથી) જે અભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી) સાધ્યતા હોય..... ઈત્યાદિ લક્ષણ પૂર્વવત્

દોષ :- 'वह्निरयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन समवायेन वह्नित्वविशिष्टवत्, तज्ज्ञानत्वात् - આ સ્થલમાં સમવાયથી વહ્નિત્વવિશિષ્ટ હોતે છતે જે કાલિકથી વહ્નિત્વવિશિષ્ટ હોય તેનો અભાવ લઈને અવ્યાપ્તિ આવશે.

(૬) જો ષષ્ઠ સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા ત્રણ સંબંધથી) જે અભાવીયપ્રતિયોગિતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વઉભયસંબંધથી) સાધ્યતા હોય..... ઈત્યાદિ પૂર્વવત્

દોષ :- 'वह्निरयम्' इत्येतज्ज्ञानं विषयितासम्बन्धेन वह्निविशिष्टं तज्ज्ञानत्वात् - આ સ્થલે સમવાયથી વહ્નિત્વવિશિષ્ટનો અભાવ લઈને અવ્યાપ્તિ આવશે.

❀ દ્વિતીયવ્યાપ્તિમાં પ્રવિષ્ટ સંબંધષટ્કનું પ્રયોજન ❀

હવે, **સાધ્યતાવ્યાપકત્વદિશામાં વ્યાપ્યતાઘટકસંબંધકોટિમાં**

(૭) જો સપ્તમસંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્, દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ બે સંબંધથી) સાધ્યતા છે..... ઈત્યાદિ પૂર્વવત્

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં ઘટત્વનિષ્ઠ, સમવાયસંબંધઅવચ્છિન્ન, દુનિયાના તમામ ધર્મથી અનવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ.

(૮) જો અષ્ટમ સંબંધનો પ્રવેશ ન કરાવવામાં આવે તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્, દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વઉભયસંબંધથી) સાધ્યતા હોય..... ઈત્યાદિ પૂર્વવત્.

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં કાલિકસંબંધઅવચ્છિન્ન, વહ્નિત્વવૃત્તિ, દુનિયાના તમામ ધર્મોથી અનવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ.

(૯) નવમા સંબંધનો પ્રવેશ કરાવવામાં ન આવે તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્. દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ - આ બે સંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી..... ઈત્યાદિ પૂર્વવત્

દોષ :- पर्वतो वह्निमान् धूमात् - આ સ્થલમાં વહ્નિત્વવૃત્તિ, સમવાયસંબંધઅવચ્છિન્ન, ધર્મવિધયા સાવચ્છિન્ન એવી અવચ્છેદકતાને લઈને અવ્યાપ્તિ આવે.

(૧૦) **વ્યાપકતાઘટકસંબંધકોટિમાં** દસમા સંબંધનો પ્રવેશ કરાવવામાં ન આવે તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્. દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વ - આ ત્રણ સંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિત-

य एतत्सर्वं मनसिकृत्याह - **साध्यताव्यापकत्वदिशि** = साध्यतायाः व्यापकता यस्यां शो व्याप्तौ भासते तत्र, अर्थात् "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता

अवच्छेदकतावत्तासंबंधथी (अवच्छेदकतावत्ता स्वअवच्छेदकसंबंधअवच्छिन्नत्व-स्वअनवच्छेदक-अनवच्छिन्नत्वउभयसंबंधथी) जे अभावीयप्रतियोगिता होय..... ઈત્યાદિ લક્ષણ પૂર્વવત્.

દોષ :- 'तार्णवह्निरयम्' इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात् - આ સ્થલમાં વહ્નિઅભાવને લઈને અવ્યાપ્તિ.

(૧૧) અગિયારમા સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્. દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતા-વત્તાસંબંધથી (અવચ્છેદકતાવત્તા ઉક્તત્રિતયસંબંધથી) સાધ્યતા છે ત્યાં ત્યાં સ્વનિરૂપિત-અવચ્છેદકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅનવચ્છેદકઅનવ-ચ્છિન્નત્વઉભયસંબંધથી) જે અભાવીયપ્રતિયોગિતા હોય..... ઈત્યાદિ લક્ષણ પૂર્વવત્.

વિ **દોષ :- 'वह्निरयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन वह्नित्वविशिष्टः तद्वत्, तज्ज्ञानत्वात्** न - આ સ્થલમાં સમવાયથી વહ્નિત્વવિશિષ્ટનો અભાવ લઈને અવ્યાપ્તિ આવશે.

પ્રા (૧૨) જો બારમા સંબંધનો પ્રવેશ ન કરાવો તો

લક્ષણ :- પ્રથમ વ્યાપ્તિ પૂર્વવત્. દ્વિતીય વ્યાપ્તિમાં જ્યાં જ્યાં સ્વનિરૂપિતઅવચ્છેદકતા-વત્તાસંબંધથી સાધ્યતા હોય (અવચ્છેદકતાવત્તા ત્રિતયસંબંધથી) ત્યાં ત્યાં સ્વનિરૂપિતઅવચ્છે-દકતાવત્તાસંબંધથી (અવચ્છેદકતાવત્તા સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ-ઉભયસંબંધથી) જે અભાવીયપ્રતિયોગિતા હોય..... ઈત્યાદિ પૂર્વવત્.

દોષ :- 'वह्निरयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन वह्नित्व-विशिष्टवत्, तज्ज्ञानत्वात् - આ સ્થલમાં વહ્નિઅભાવને લઈને અવ્યાપ્તિ આવશે.

આ રીતે, સંપૂર્ણ ૧૨ સંબંધયુક્ત લક્ષણ જ યુક્તિયુક્ત છે.

❄ ભાવઅનુસારી શબ્દ, શબ્દાનુસારી અર્થ ! ❄

શબ્દાર્થ :- સાધ્યતાવ્યાપકત્વની દિશામાં પણ વ્યાપ્યતાઘટકસંબંધકોટિમાં તે તે સ્વસામાનાધિકરણ્ય વગેરે સંબંધનો પ્રવેશ કરવામાં ન આવે તો ઉક્ત રીતે જ = પ્રતિયોગિતા-

साध्यताव्यापकत्वदिशि व्याप्यताघटकसम्बन्धकोटौ तत्तत्सम्बन्धाऽनुपादान उक्तरीत्यैव 'वह्निमान् धूमाद्' इत्यत्राऽव्याप्तिरस्यात् ।

●

स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते" - इत्येतद्व्याप्तौ व्यापकताघटकसम्बन्धकोटौ स्वसामानाधिकरण्यादित्रयाणां सम्बन्धानामुपादाने, एतत्प्रवेशप्रयोजनं प्राग्वदत्रापि भावनीयम्, **व्याप्यताघटकसम्बन्धकोटौ** स्वसामानाधिकरण्यादि**तत्तत्सम्बन्धानुपादाने उक्तरीत्यैव** = प्रतियोगिताव्यापकत्वदिशि व्याप्यताघटकसम्बन्धविधया निविष्टस्वसामानाधिकरण्यादिसम्बन्धत्रयप्रवेशप्रयोजनप्रदर्शनावसरे प्रदर्शितरीत्यैव **वह्निमान् धूमात् - इत्यत्र अव्याप्तिः स्यात्**, अर्थात् (१) स्वसामानाधिकरण्यसम्बन्धाऽप्रवेशे, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यं विहाय स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदक-

●

व्यापकत्वदिशामां जे रीते बताव्युं ते रीते ज **वह्निमान् धूमात्** - आ स्थलमां अव्याप्ति आवशे. कहेवानो आशय એ छे के जो साध्यताव्यापकत्वदिशामां व्याप्यताघटकसंबंधकोटिमां स्वसामानाधिकरण्यनो प्रवेश न करावो तो **पर्वतो वह्निमान् धूमात्** - आ स्थले घटत्ववृत्ति, समवायसंबंधअवच्छिन्न, दुनियाना तमाम धर्मोथी अनवच्छिन्न એवी अवच्छेदकताने लईने अव्याप्ति आवे.

જો स्वअवच्छेदकसंबंधअवच्छिन्नत्वनो प्रवेश न करावવામાં आवे तो **पर्वतो वह्निमान् धूमात्** - आ स्थले कालिकसंबंधअवच्छिन्न, वह्नित्ववृत्ति, दुनियाना तमाम धर्मोथी अनवच्छिन्न એवी अवच्छेदकताने लईने अव्याप्ति आवे.

જો स्वअनवच्छेदकअनवच्छिन्नत्वनो प्रवेश करावવામાં न आवे तो **पर्वतो वह्निमान् धूमात्** - आ स्थले धर्म अपेक्षया सावच्छिन्न, समवायसंबंधअवच्छिन्न, वह्नित्ववृत्ति अवच्छेदकताने लईने अव्याप्ति आवशे.

सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदक-सम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरण-निरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपगम्यते, तदा पर्वतो वह्निमान् धूमात् - इत्यत्र वह्न्यभावमादायाऽपि लक्षणसमन्वयः न स्यात्, स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकान-वच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः समवाय-सम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानघटत्वे वर्तमानासु अवच्छेदकतासु सत्त्वात्, तत्र स्वसामा-नाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवाय-सम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अवृत्तेः ।

एवं (२) स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धः यदि न निवेश्यते, किन्तु यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्न-त्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवं लक्षणमभ्युपगम्यते तदाऽपि पर्वतो वह्निमान् धूमात् - इत्यत्र वह्न्यभावमादायाऽपि लक्षणसमन्वयो न स्यात्, समवायसम्बन्धाव-च्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु सत्त्वात्, तत्र च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अवृत्तेः ।

एवं (३) स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धो यदि न प्रवेश्यते, किन्तु "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धा-

व्यापकताघटकसम्बन्धेष्वपि तेषामनुपादाने विषयितासम्बन्धेन तार्णवह्निसाध्यकस्थले वह्न्यभावमादाय,

वच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदापि 'पर्वतो वह्निमान् धूमात्' - इत्यत्र वह्न्यभावमादाय लक्षणसमन्वयः न स्यात्, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः वृत्तित्वेऽपि स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अवर्तमानत्वादिति सम्बन्धत्रयमपि उपादेयम्, अत्रत्यं तत्त्वं प्रागेव न्यक्षेण भावितमिति ।

उक्तव्याप्तौ एव **व्यापकताघटकसम्बन्धेषु अपि तेषां** स्वसामानाधिकरण्यादिसम्बन्धा-**नामनुपादाने** यथाक्रमं **विषयितासम्बन्धेन तार्णवह्निसाध्यकस्थले वह्न्यभावमादाय अव्याप्तिः**

⁎ व्यापकताघटक संबंधोनुं प्रयोजन ⁎

व्यापकताघटक संबंधमां पण जो तेनुं ग्रहण न करवामां आवे तो विषयितासंबंधथी तार्णवह्निसाध्यक स्थलमां वह्निअभावने लईने, कालिकथी वह्नित्वविशिष्ट होते छते जे समवायथी वह्नित्वविशिष्ट होय ते साध्य होय जे स्थलमां ते स्थलमां समवायथी वह्नित्वविशिष्टनो अभाव लईने अने विषयितासंबंधथी वह्नित्वविशिष्टवह्निसाध्यक स्थलमां केवल वह्निअभाव लईने अव्याप्ति आवे. माटे स्वसामानाधिकरण्य वगेरे ते ते संबंधोनुं ग्रहण करेल छे.

एटले के साध्यताव्यापकत्वदिशामां व्यापकताघटक संसर्गोमां जो स्वसामानाधिकरण्यनुं

कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टस्य

स्यादिति उत्तरत्राऽन्वयः, अर्थात् स्वसामानाधिकरण्यसम्बन्धाप्रवेशे, किन्तु "यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवं लक्षणमभ्युपगम्यते तदा 'अयं तार्णवह्निः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात् - इत्यत्र विषयितासम्बन्धेन तादृशवह्न्यभावमादाय अव्याप्तिः स्यादिति स्वसामानाधिकरण्यमवश्यं निवेशनीयम्।

यदि स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धो न निवेश्यते, किन्तु यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणमभ्युपगम्यते तदा **कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टस्य विषयितया** = विषयितासम्बन्धेन

ગ્રહણ ન કરવામાં આવે તો **'तार्णवह्निरयम्' इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात्** - આ સ્થલમાં વહ્નિઅભાવને લઈને અવ્યાપ્તિ આવે.

જો સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વનું ગ્રહણ ન કરવામાં આવે તો -

विषयितया साध्यतायां समवायेन वह्नित्वविशिष्टाभावमादाय, विषयितया वह्नित्वविशिष्टवह्निसाध्यकस्थले वह्न्यभावमादायाऽव्याप्तिरस्यादिति तत्तत्सम्बन्धनिवेशः ।

●

साध्यतायाम् अर्थात् 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन वह्नित्वविशिष्टः तद्वत्, तज्ज्ञानत्वात् - इत्यत्र **समवायेन वह्नित्वविशिष्टाभावमादाय अव्याप्तिः** स्यादित्युत्तरत्राऽन्वयः ।

एवं स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धाऽप्रवेशे, "यत्र यत्र स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीय-प्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन) साध्यता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः - इत्येवमेव लक्षणमभ्युपगम्यते तदा **विषयितया वह्नित्वविशिष्टवह्निसाध्यकस्थले वह्न्यभावमादाय,** अर्थात् 'अयं समवायेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन वह्नित्वविशिष्टवह्निमत्, तज्ज्ञानत्वात् - इत्यत्र वह्न्यभावमादायाऽ**व्याप्तिः स्यादिति** स्वसामानाधिकरण्यादि**तत्तत्सम्बन्धनिवेशः** इति सम्बन्धद्वादशकमवश्यं निवेशनीयम् इति ।

●

'वह्निरयं समवायेन वह्नित्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन समवायेन वह्नित्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टः तद्वत्, तज्ज्ञानत्वात् - આ સ્થલમાં સમવાયથી વહ્નિત્વવિશિષ્ટના અભાવને લઈને અવ્યાપ્તિ આવે.

જો સ્વઅનવચ્છેદકઅનવચ્છિન્નત્વનો પ્રવેશ ન કરાવો તો **'वह्नित्वविशिष्टोऽयं वह्निः' इत्येतज्ज्ञानं विषयितासम्बन्धेन वह्नित्वविशिष्टवत्, तज्ज्ञानत्वात्** - આ સ્થલમાં વહ્નિઅભાવને લઈને અવ્યાપ્તિ આવશે. માટે, તે તે સંબંધનો પ્રવેશ કરાવવો જરૂરી છે.

ननु अस्तु सम्बन्धद्वादशकप्रवेशसार्थक्यम्, किन्तु यथा (= यादृशरीत्या) तन्निवेश्यते तथा न लाघवम्, अपि तु निरर्थकगौरवमेव । भवता हि साध्यतासामनैयत्यमभिप्रेताऽभावीय-प्रतियोगितायां निवेशितम्, तच्च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन गृहीतम्, अवच्छेदकतावत्ता स्वसामानाधिकरण्यादिसम्बन्धत्रितयेन गृहीता, एवं हि निरर्थकायासः, स्वनिरूपितावच्छेदकतावत्ता सम्बन्धस्याऽन्तर्गडुतुल्यस्याऽऽवश्यकता एव का ? एवं हि लक्षणमभ्युपगम्यताम् -

स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितय-सम्बन्धेन साध्यतावच्छेदकतासमनियताऽवच्छेदकतानिरूपितप्रतियोगितानिरूपकाभावाधिकरणनिरू-पितवृत्तित्वाभावः इति । अर्थात् "यत्र यत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकता वर्तते तत्र तत्र स्वसामानाधिकरण्य -स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन यदभावीयप्रतियोगितावच्छेदकता वर्तते, यत्र यत्र च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन यदभावीयप्रतियोगितावच्छेदकता वर्तते, तत्र तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकता वर्तते तदभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमङ्गीक्रियताम्, निरायासकारिणा एतेन लक्षणेनाऽपि प्रयोजनसिद्धेः ।

तथा हि - एतल्लक्षणाङ्गीकारे एकत्वादेः पर्याप्त्यनभ्युपगमपक्षेऽपि लक्षणसमन्वयः सम्भवत्येव । किञ्च, 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादायाऽव्याप्तिरपि न सम्भवति।

तद्यथा - प्रकृते साध्यतानिरूपिताऽवच्छेदकता त्रेधा वर्तते - (१) कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, (२) समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, (३) समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमान-द्रव्यत्वे वर्तमाना अवच्छेदकता च । या कालिकसम्बन्धावच्छिन्ना शब्दतोऽनुल्लिख्यमानवह्नित्वे

वर्तमाना अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकता-विशिष्टा भवति, कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया कालिकसम्बन्धावच्छिन्नवह्नित्व-निष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, कालिकसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां कालिकसम्बन्धावच्छिन्न-वह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदककालिकसम्बन्धावच्छिन्नत्वसत्त्वात्, कालिकसम्बन्धावच्छि-न्नायाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानायाः अत एव धर्मविधया केनचिदपि अनवच्छिन्नायाः अवच्छेदकतायाः वह्नित्वत्वेनाऽपि अनवच्छिन्नतया कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठा-वच्छेदकतायां कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकवह्नित्व-त्वेतरधर्मानवच्छिन्नत्वाऽवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानव-च्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते एव ।

य शो ल ता

एवं कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकताऽपि स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्व-सम्बन्धेन च कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, कालिकसम्ब-न्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे कालिकसम्बन्धावच्छिन्नतादृशवह्नित्व-निष्ठावच्छेदकतायाः वृत्तितया कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधि-करण्यस्य कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, कालिकसम्बन्धेनैवाऽ-वच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यता-वच्छेदकतावच्छेदककालिकसम्बन्धावच्छिन्नत्वसत्त्वात्, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्य-तावच्छेदकतायाः कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाश्च वह्नित्वत्वेनैवाऽ-वच्छिन्नतया वह्नित्वत्वेतरेणाऽनवच्छिन्नतया च कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यता-वच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वस्य कालिकसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठा-वच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदका-

नवच्छिन्नत्वैतत्त्रितयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते एव ।

एवं समवायसम्बन्धावच्छिन्ना शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नायाः शब्दतः अनुल्लिख्यमानवह्नित्वे वर्तमानायाः अत एव धर्मविधया केनचिदपि अनवच्छिन्नायाः अवच्छेदकतायाः वह्नित्वत्वेनाऽपि अनवच्छिन्नतया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायामवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः धर्तुं शक्यन्ते ।

एवं या समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवति, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकताधिकरणे वह्नित्वे समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशवह्नित्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नायाः शब्दतः

उल्लिख्यमानवह्नित्वे वर्तमानायाः तादृशावच्छेदकतायाः समवायसम्बन्धावच्छिन्नतादृशवह्नित्व-निष्ठसाध्यतावच्छेदकतायाश्च वह्नित्वत्वेनैवाऽवच्छिन्नतया वह्नित्वत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदकवह्नित्वत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नतादृशवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः अपि लभ्यन्ते ।

एवं या समवायसम्बन्धावच्छिन्ना शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता सा स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवत्येव, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकताधिकरणे द्रव्यत्वे समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशद्रव्यत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नायाः शब्दतः अनुल्लिख्यमानद्रव्यत्वे वर्तमानायाः, धर्मविधया केनचिदपि अनवच्छिन्नायाः अवच्छेदकतायाः द्रव्यत्वत्वेनाऽपि अनवच्छिन्नतया समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावच्छेदकद्रव्यत्वत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायामवश्यम्भावाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः लभ्यन्ते एव ।

समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता स्वसामानाधिकरण्यसम्बन्धेन, स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन च समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकताविशिष्टा भवेदेव, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकताधिकरणे द्रव्यत्वे समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठा-

वच्छेदकतायाः वृत्तितया समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठसाध्यतावच्छेदकतासामानाधिकरण्यस्य समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायां सत्त्वात्, समवायसम्बन्धेनैवाऽवच्छिन्नायां तादृशद्रव्यत्वनिष्ठावच्छेदकतायां समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावच्छेदकसमवायसम्बन्धावच्छिन्नत्वसत्त्वात्, समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठसाध्यतावच्छेदकतायाः समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायाश्च द्रव्यत्वत्वेनैवाऽवच्छिन्नतया द्रव्यत्वत्वेतरेणाऽनवच्छिन्नतया च समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावच्छेदकद्रव्यत्वत्वेतरधर्मानवच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नतादृशद्रव्यत्वनिष्ठावच्छेदकतायां सत्त्वाच्चेति स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः अपि लभ्यन्ते एव ।

इत्थञ्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया च समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते, अर्थात् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

य शो ल ता

कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगितानिरूपिताऽवच्छेदकता द्वेधा - कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता च। तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते । एवं स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः अपि न भवन्ति, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकताविशिष्टाः अपि न भवन्ति ।

अतः यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकता वर्तते तत्र तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टः तदभावीयप्रतियोगितावच्छेदकता

वर्तते एव इति कथयितुं न शक्यते, कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशाभावीयप्रतियोगितावच्छेदकतायाः वर्तमानत्वेऽपि समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च अवर्तमानत्वात् ।

तथा च यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः अनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशाभावीयप्रतियोगितावच्छेदकता वर्तते तत्र तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकता वर्तते एव, किन्तु यत्र यत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन साध्यतावच्छेदकता वर्तते तत्र तत्र स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन तादृशाभावीयप्रतियोगितावच्छेदकता वर्तते एवेति नेति कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावो धर्तुं न शक्यते इति कथं तमादायाऽव्याप्त्याशङ्काऽपि ?

किन्तु प्रकृते कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः एव ग्राह्यः । तादृशाभावीयप्रतियोगितानिरूपिताऽवच्छेदकता त्रिविधा - कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता च । तथा च पूर्ववत् स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन कालिकसम्बन्धा-

एवं पूर्वोक्तरीत्या "यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव" - इति कथयितुं शक्यते एव । तथा च साध्यतासामनैयत्यं तादृशाभावीयप्रतियोगितायां वर्तते एव ।

एवं पूर्वोक्तरीत्या तादृशाभावीयप्रतियोगितायां स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं वर्तते एवेति कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावो धर्तुं शक्यते । पूर्वोक्तरीत्या तादृशाभावाधिकरणविधया 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं लभ्यते एव, तत्र च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि हि स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धो निवेश्यते तदा कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टः तदभावीयप्रतियोगितायाः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः अनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः

उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्चैव लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाः अवच्छेदकताः न लभ्यन्ते इति यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवाय-सम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते एव - इति कथयितुं न शक्यते । तथा च कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः धर्तुं न शक्यते, किन्तु कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावो धर्तव्यः पूर्वोक्तरीत्या । तादृशाभावाधिकरणविधया च 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं न लभ्यते, किन्तु अन्यदेव, तत्र च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवा-ऽव्याप्तिरिति स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धोऽपि अवश्यं प्रवेशनीयः ।

यदि प्रतियोगितायां साध्यताव्याप्यता यस्यां व्याप्तौ प्रतीयते तत्र व्यापकताघटकसम्बन्धविधया सम्बन्धद्वयमुपादाय व्याप्यताघटकसम्बन्धविधया स्वसामानाधिकरण्यं न निवेश्यते, अपि तु 'स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्य-तावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिता-निरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपिता-

वच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमभ्युपगम्यते तदा पर्वतो वह्निमान् धूमात् - इत्यत्र वह्न्यभावमादायाऽपि लक्षणसमन्वयासम्भवाद् व्याप्तिलक्षणाऽप्रसक्तिः भवेदेव, यतः स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः घटत्वनिष्ठाः अवच्छेदकताः अपि लभ्यन्ते, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाः अवच्छेदकताः एव लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः घटत्वनिष्ठाः अवच्छेदकताः न लभ्यन्ते । तथा चाऽत्रावश्यं स्वसामानाधिकरण्यसम्बन्धः निवेश्यः ।

एवं तत्रैव स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धो न प्रवेश्यते, किन्तु 'स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः' - इत्येवमेव लक्षणमभ्युपगम्यते तदा पर्वतो वह्निमान् धूमात् - इत्यत्र वह्न्यभावमादाय लक्षणसमन्वयाऽसम्भवात् स्यादेव व्याप्तिलक्षणाऽप्रसक्तिः, स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु अपि सत्त्वात्, तत्र च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अवर्तमानत्वात् । तथा च स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धोऽवश्यं प्रवेशनीयः।

यदि तादृशव्याप्तौ एव व्यापकताघटकसम्बन्धविधया स्वसामानाधिकरण्यसम्बन्धो न निवेश्यते, किन्तु 'स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूप-वृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरू-पितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छि-न्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्ब-न्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यद-भावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यता वर्तते तादृशश्च योऽभावः तदधिकरणनिरूपित-वृत्तित्वाभावः' - इत्येवमेव लक्षणमभ्युपगम्यते तदा ***यद्यपि*** 'पर्वतो वह्निमान् धूमात्' - इत्यत्र वह्न्यभावमादाय लक्षणसमन्वयो भवति, स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभय-सम्बन्धेन वह्न्यभावीयप्रतियोगितावच्छेदकतायाः अधिकरणविधया लभ्यसमवायसम्बन्धावच्छिन्न-वह्नित्वनिष्ठावच्छेदकतासु स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन साध्यतावच्छेदकतायाः अवश्यं सत्त्वात् । एवम् 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादाय अव्याप्तिः न सम्भवति, तद्यथा - पूर्वोक्तरीत्या साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रति-योगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया तादृशाभावीयप्रतियोगितावच्छेदकतात्वेतर-धर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया च वह्नित्व-द्रव्यत्वगत-द्वित्वस्यैव प्राप्तेः तादृशाभावीयप्रतियोगितायां स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं वर्तते एव ।

स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्न-वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगितावच्छेदकता-यांश्च अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः वह्नित्वनिष्ठाः अवच्छेदकताः, समवायसम्बन्धा-

वच्छिन्नाः द्रव्यत्वनिष्ठाः अवच्छेदकताश्च लभ्यन्ते इति एताः एवाऽवच्छेदकताः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) तादृशाभावीयप्रतियोगितायाः अधिकरणविधया लभ्यन्ते ।

एवं स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकताः, कालिकसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकताः इत्याद्यवच्छेदकताः लभ्यन्ते । एतासु अवच्छेदकतासु स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया प्राप्यमाणाः अवच्छेदकताः अन्तर्भूता एव । अतः यत्र यत्र (= कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यता वर्तते एव - इति कथयितुं शक्यते ।

किन्तु यत्र यत्र (= कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठावच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते एव - इति कथयितुं न शक्यते, अतः कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः धर्तुं न शक्यते, किन्तु प्रकृते कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः एव ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्न स्यादेवाऽव्याप्तिः, ***तथापि*** 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन

द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादायाऽव्याप्तिः दुर्वारा, तद्यथा - प्रकृते साध्यतावच्छेदकतायाः तादृशाभावीयप्रतियोगितावच्छेदकतायाश्च वह्नित्व-द्रव्यत्वयोरेव पर्याप्ततया साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया तादृशाभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया च वह्नित्व-द्रव्यत्वगतद्वित्वस्यैव प्राप्तेः तादृशाभावीयप्रतियोगितायां स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं स्यादेव ।

साध्यतानिरूपिताऽवच्छेदकता द्वेधा - कालिकसम्बन्धावच्छिन्ना वह्नित्वनिष्ठा अवच्छेदकता, समवायसम्बन्धावच्छिन्ना द्रव्यत्वनिष्ठा अवच्छेदकता च । स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च भवेत्, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च भवेत्, अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

तादृशाभावीयप्रतियोगितानिरूपितावच्छेदकता त्रेधा - कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमान-

वह्नित्वे वर्तमाना अवच्छेदकता, समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता च । तथा च स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च भवेत् । स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु चैव भवेत् । एवं समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगितावच्छेदकतावत्ता समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु चैव भवेत् । अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगितायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते । आसु अवच्छेदकतासु स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन साध्यतावच्छेदकतायाः अधिकरणविधया लब्धाः अवच्छेदकताः अन्तर्भवन्त्येव।

अतः यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन)

साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते एव - इति कथयितुं शक्यते ।

स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नघटत्वादिनिष्ठावच्छेदकताः अपि लभ्यन्ते, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः अपि लभ्यन्ते । तथा च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानघटत्वे वर्तमानाः अवच्छेदकताः इत्याद्यवच्छेदकताः लभ्यन्ते । अतः यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यं विहाय केवलस्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यता वर्तते एव ।

तथा च कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः

या शो ल ता

समवायेन द्रव्यत्वविशिष्टस्तदभावो धर्तुं शक्यते, 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञाने कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टः सः विषयतया न भासते, तथा च कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावाधिकरणविधया 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानमेव लभ्यते, तत्र च तज्ज्ञानत्वहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

यदि हि स्वसामानाधिकरण्यसम्बन्धो निवेश्यते तदा स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्चैव लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः वा नैव लभ्यन्ते, यतः स्वसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ताऽपि, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकतावत्ताऽपि च समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु वा नैव सम्भवति, तादृशाऽवच्छेदकतासु कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावच्छेदककालिकसम्बन्धावच्छिन्नत्वस्य समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठसाध्यतावच्छेदकताधिकरणद्रव्यत्ववृत्तित्वस्य चाऽसत्त्वात् ।

तथा च यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धा-

वच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः यः तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव - इति कथयितुं न शक्यते । तथा च कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः धर्तुं न शक्यते ।

किन्तु प्रकृते कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः यः तदभावः एव ग्राह्यः । तादृशाभावीयप्रतियोगितानिरूपितावच्छेदकता द्वेधा - (१) कालिकसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानवह्नित्वे वर्तमाना अवच्छेदकता, (२) समवायसम्बन्धावच्छिन्ना शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमाना अवच्छेदकता च । स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतावत्ता कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च भवेत्, समवायसम्बन्धावच्छिन्नद्रव्यत्वनिष्ठप्रतियोगितावच्छेदकतावत्ता च समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च भवेत् । ततश्च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) तादृशाभावीयप्रतियोगितायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्च लभ्यन्ते ।

तथा च यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु,

समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्ता-सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते, यत्र यत्र च (= तासु एवाऽवच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टः तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव ।

किञ्च, प्रकृते साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगिता-वच्छेदकरूपविधया तादृशाभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपक-पर्याप्त्यनुयोगितावच्छेदकरूपविधया च वह्नित्व-द्रव्यत्वगतद्वित्वस्यैव प्राप्तेः तादृशाभावीय-प्रतियोगितायां स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्व-सम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूप-वृत्तित्वं वर्तते एव ।

तथा च कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः धर्तुं शक्यते । 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञाने कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः यः तस्य विषयतया कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावाधिकरणविधया 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं न लभ्यते, किन्तु अन्यदेव, तत्र च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिरिति स्वसामानाधिक-रण्यसम्बन्धोऽवश्यं प्रवेशनीयः ।

यदि तत्रैव स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धो न प्रवेश्यते, किन्तु "स्वावच्छेदकता-त्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकता-

त्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते एव तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदा 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन यः द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादायाऽव्याप्तिः स्यादेव ।

तद्यथा - स्वसामानाधिकरण्यसम्बन्धेन कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतावत्ता यथा कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च वर्तते तथैव समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु चाऽपि भवेत् । अतः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः इत्याद्यवच्छेदकताः लभ्यन्ते ।

तथा च यत्र यत्र (= कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवाय-सम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धा-वच्छिन्नासु शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टः तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते एव । पूर्वोक्तरीत्या यत्र यत्र (= कालिकसम्बन्धा-
य वच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु
शो शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लि-
ल ख्यमानद्रव्यत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानद्रव्यत्वे
ता वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामाना-
धिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपिता-
वच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभय-
सम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते एव ।

एवं पूर्वोक्तरीत्या तादृशाभावीयप्रतियोगितायां स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमपि वर्तते । अतः कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः धर्तुं शक्यते। तदधिकरणविधया च 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं लभ्यते एव, तत्र च तज्ज्ञानत्वहेतोर्वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः।

अत्र तार्णवह्नेर्विषयितया साध्यतायां वह्नितार्णाभावमादाया-ऽव्याप्तिवारणायैकत्वादेः पर्य्याप्त्यभ्युपगमेन साध्यतावच्छेदकतात्वा-

●

यदि स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धो निवेश्यते तदा पूर्वोक्तरीत्या स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, कालिकसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानद्रव्यत्वे वर्तमानाः अवच्छेदकताश्चैव लभ्यन्ते, समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताः, समवायसम्बन्धावच्छिन्नाः शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानाः अवच्छेदकताश्च न लभ्यन्ते, एताश्च समवायसम्बन्धावच्छिन्नाः शब्दतोऽनुल्लिख्यमानवह्नित्वे, शब्दतः उल्लिख्यमानवह्नित्वे च वर्तमाना अवच्छेदकताः स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावीयप्रतियोगितायाः अधिकरणविधया लभ्यन्ते इति कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावो धर्तुं न शक्यते, किन्तु प्रकृते कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावः एव पूर्वोक्तरीत्या ग्राह्यः, तदधिकरणे च तज्ज्ञानत्वहेतोरवृत्तितया लक्षणसमन्वयान्नास्त्येवाऽव्याप्तिः इति स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धोऽवश्यं प्रवेशनीयः । एवं सम्बन्धाष्टकमवश्यं निवेशनीयम् इति साधितम् ।

एतत्सर्वं मनसिकृत्याह - **अत्र** = सामनैयत्यघटितप्रकृतलक्षणे **तार्णवह्नेः विषयितया साध्यतायां** = 'अयं तार्णवह्निः' इत्येतज्ज्ञानं विषयितासम्बन्धेन तार्णवह्निमत्, तज्ज्ञानत्वात् - इत्यत्र **वह्नितार्णाभावमादाय अव्याप्तिवारणाय एकत्वादेः पर्य्याप्त्यभ्युपगमेन** = एकत्वादेः

●

✱ शब्दानुपाती भाव भावानुपाती शब्दोमां ✱

शब्दार्थ :- अत्र = साध्यतासमनियतप्रतियोगितानिरूपकअभावअधिकरणअवृत्तित्व - આ લક्षणमां विषयितासंबंधथी तार्णवह्नि साध्य होय त्यारे वह्नितार्णअभावने लईने आवती अव्याप्तिनुं वारण करवा माटे એકत्व वगेरेनी पर्याप्ति स्वीकारी लई पूर्वोक्त

गूढार्थतत्त्वा *वच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वविवक्षणे स्वावच्छेदक-सम्बन्धानवच्छिन्नत्व-स्वसामानाधिकरण्योभयसम्बन्धेनाऽवच्छेदकतावत्त्वं वाच्यम् ।*

तदुभयफलन्तु कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टसाध्यकस्थले समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टाभावमादायाऽव्याप्तिवारणम् ।

●

पर्याप्तिमभ्युपगम्य, एकत्वादेः पर्याप्त्यभ्युपगमपक्षे वा **साध्यतावच्छेदकतात्वावच्छिन्नपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वविवक्षणे** = स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वपरिष्काराङ्गीकारे **स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वसामानाधिकरण्योभयसम्बन्धेनाऽवच्छेदकतावत्त्वं वाच्यम्**, स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धस्याऽनावश्यकत्वात्, उक्तपर्याप्तिघटितपरिष्कारेणैव तस्य चरितार्थत्वात् । तथा च "स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे वर्तमाना, स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यतासमनियता च या प्रतियोगिता तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणं वाच्यम् ।

तदुभयफलं तु = स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धप्रवेशप्रयोजनं तु **कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन वह्नित्वविशिष्टसाध्यकस्थले** = पर्वतः कालिकेन महानसीयत्वविशिष्टत्वे सति यः समवायेन वह्नित्वविशिष्टः तद्वान्, धूमात् - इत्यत्र **समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन वह्नित्वविशिष्टाभावमादाय अव्याप्तिवारणम्**, अन्यतरसम्बन्धाऽप्रवेशे तादृशस्थले तादृशाभावमादायाऽव्याप्त्यापत्तेः ।

●

વિ સાધ્યતાઅવચ્છેદકતાત્વઅવચ્છિન્ન(પ્રતિયોગિતાનિરૂપક)પર્યાપ્તિઅનુયોગિતાઅવચ્છેદકરૂપ-વૃત્તિત્વસ્વરૂપ પરિષ્કારની પણ વિવક્ષા કરો તો સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિ-ન્નત્વ ઉભયસંબંધથી જ અવચ્છેદકતાવત્તા જણાવવી / કહેવી. તદુભયફલન્તુ = આ બે સંબંધથી ઘટિત લક્ષણ બનાવવાનું ફળ અથવા તો પર્યાપ્તિઘટિત પૂર્વોક્ત પરિષ્કાર અને

ननु भवता एव पूर्वं साधितम् - स्वसामानाधिकरण्यसम्बन्धाऽप्रवेशेन "स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता वर्तते एव तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणाऽभ्युपगमे पर्वतः कालिकेन महानसीयत्वविशिष्टत्वे सति यः समवायेन वह्नित्वविशिष्टः तद्वान् धूमात् - इत्यत्र समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन यः वह्नित्वविशिष्टः तदभावमादायाऽव्याप्तिः न सम्भवति, यतः यत्र यत्र (= समवायसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानमहानसीयत्वे वर्तमानासु अवच्छेदकतासु, समवायसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानमहानसीयत्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतोऽनुल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु, कालिकसम्बन्धावच्छिन्नासु शब्दतः उल्लिख्यमानवह्नित्वे वर्तमानासु अवच्छेदकतासु च) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन

●

સમનિયતત્વ-ઘટિત પરિષ્કાર - ઉભયના મિશ્રણનું ફળ એ કે કાલિકથી મહાનસીયત્વવિશિષ્ટ હોતે છતે જે સમવાયથી વહ્નિત્વવિશિષ્ટ હોય તે જેમાં સાધ્ય હોય તેવા સ્થલમાં સમવાયથી મહાનસીય-ત્વવિશિષ્ટ હોતે છતે જે કાલિકથી વહ્નિત્વવિશિષ્ટ હોય તેનો અભાવ લઈને આવતી અવ્યાપ્તિનું વારણ.

યાદ રહે કે સ્વસામાનાધિકરણ્ય કે સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વ - આ બે સંબંધના પદકૃત્ય રૂપે ગ્રંથકારે પૂર્વોક્ત સ્થલ નથી બતાવ્યું. કારણ કે કોઈ એકાદ સંબંધનો પ્રવેશ ન કરાવો અને બાકીના સાત સંબંધોનો પ્રવેશ કરાવો તો ઉક્ત સ્થલે અવ્યાપ્તિ આવતી નથી. જો સ્વસામાનાધિકરણ્ય-સ્વઅવચ્છેદકસંબંધઅવચ્છિન્નત્વઉભયસંબંધનો પ્રવેશ ન કરાવો, તે

वह्नित्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्य-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन) साध्यता नैव वर्तते, तत्कथम् अधुना एवं प्रतिपाद्यते यद् एकतरस्याऽपि सम्बन्धस्याऽप्रवेशे उक्तस्थले उक्ताभावमादायाऽव्याप्तिः भवति, ग्रन्थकृता 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति, समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादाय 'अयं कालिकेन वह्नित्वविशिष्टत्वे सति समवायेन द्रव्यत्वविशिष्टः' - इत्येतज्ज्ञानं विषयितासम्बन्धेन कालिकेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तद्वत्, तज्ज्ञानत्वात् - इत्यत्र च कालिकेन वह्नित्वविशिष्टत्वे सति, समवायेन वह्नित्वविशिष्टत्वे सति यः समवायेन द्रव्यत्वविशिष्टस्तदभावमादायाऽव्याप्तिः प्रदर्शनीया भवेत्, तत्तत्सम्बन्धाप्रवेशेऽव्याप्तेः तत्र सद्भावा***दिति चेत् ?***

न; आशयाऽपरिज्ञानात् । अयं हि आशयः ग्रन्थकृतः - सामनैयत्यघटकसम्बन्धविधया स्वसामानाधिकरण्यसम्बन्धमेव अभ्युगम्य "स्वनिरूपिताऽवच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यतासमनियता, स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे वर्तमाना च या प्रतियोगिता तन्निरूपकाभावाधिकरणनिरूपित-वृत्तित्वाभावः" - इत्येवं लक्षणमभ्युपगम्यते, अर्थात् "स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगिता-निरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्ता-

પણ બન્ને વ્યાપકતાઘટકસંબંધકોટિમાં, તો જ પૂર્વોક્ત સ્થળે અવ્યાપ્તિ આપી શકાય છે. અથવા કેવલ પર્યાપ્તિઘટિત પૂર્વોક્તપરિષ્કાર જ રાખો તો પણ અવ્યાપ્તિ આપી શકાય છે. માટે, તે તે પરિષ્કારના પ્રવેશના ફલ તરીકે ઉક્ત અવ્યાપ્તિનું વારણ ગ્રંથકારે દર્શાવ્યું છે એટલે કે આ શબ્દાર્થમાં હમણાં જણાવેલ બે અર્થમાંથી કોઈ એક અર્થ સ્વીકારવો - તે ઉચિત છે. આ અંગેના વિગતપૂર્ણ અને રહસ્યભૂત તત્ત્વને જાણવાના જિજ્ઞાસુઓને સંસ્કૃતવૃત્તિ **'યશોલતા'**નું અવગાહન કરવા વિભ્રમ ભલામણ.

सम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते एव तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदा 'पर्वतः कालिकेन महानसीयत्वविशिष्टत्वे सति समवायेन चः वह्नित्वविशिष्टस्तद्वान्, धूमात्' - इत्यत्र समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टस्तदभावमादायाऽव्याप्तिः दुर्वारा, यतः साध्यतावच्छेदकतायाः तादृशाभावीयप्रतियोगितावच्छेदकतायाश्च अधिकरणविधया महानसीयत्व-वह्नित्वयोरेव प्राप्त्या साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया तादृशाभावीयप्रतियोगितावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपविधया च महानसीयत्व-वह्नित्वगतद्वित्वस्यैव प्राप्त्या स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपक़पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वं तादृशाभावीयप्रतियोगितायां स्यादेव ।

स्वसामानाधिकरण्यसम्बन्धेन कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः अपि लभ्यन्ते, कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतास्तु लभ्यन्ते एव, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठसाध्यतावच्छेदकतायाः अधिकरणविधया च कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः अपि लभ्यन्ते, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतास्तु लभ्यन्ते एव इति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः..... इत्याद्यवच्छेदकताः लभ्यन्ते।

एवं स्वसामानाधिकरण्यसम्बन्धेन समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः अपि

लभ्यन्ते, समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतास्तु लभ्यन्ते एव, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः अधिकरणविधया समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः अपि लभ्यन्ते, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतास्तु लभ्यन्ते एव इति स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टस्तदभावीयप्रतियोगितायाः अधिकरणविधया कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकताः, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकताः इत्याद्यवच्छेदकताः लभ्यन्ते ।

तथा च यत्र यत्र (= कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु इत्याद्यवच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते एव, यत्र यत्र च (= समवायसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतासु, कालिकसम्बन्धावच्छिन्नमहानसीयत्वनिष्ठावच्छेदकतासु, कालिकसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु, समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठावच्छेदकतासु इत्याद्यवच्छेदकतासु) स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टस्तदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यता वर्तते एव इति समवायेन महानसीयत्वविशिष्टत्वे सति कालिकेन यः वह्नित्वविशिष्टस्तदभावीयप्रतियोगितायां स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वसामानाधिकरण्यसम्बन्धेन) साध्यतासामनैयत्यं विद्यते एव । तथा च तादृशोऽभावः धर्तुं शक्यते, तदधिकरणविधया च पर्वतः लभ्यते, तत्र च धूमहेतोः वृत्तितया लक्षणाऽसमन्वयात् स्यादेवाऽव्याप्तिः ।

एवं यदि सामनैयत्यघटकसम्बन्धविधया केवलस्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धः एव

निवेश्यते, "स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यतासमनियता, स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपे वर्तमाना च या प्रतियोगिता तन्निरूपकाभावाधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव च लक्षणमभ्युपगम्यते, अर्थात् "स्वावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वेतरधर्मानवच्छिन्नप्रतियोगितानिरूपकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगितानिरूपकः, यत्र यत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते, यत्र यत्र च स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) यदभावीयप्रतियोगिता वर्तते तत्र तत्र स्वनिरूपितावच्छेदकतावत्तासम्बन्धेन (अवच्छेदकतावत्ता स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन) साध्यता वर्तते तादृशश्च योऽभावः तदधिकरणनिरूपितवृत्तित्वाभावः" - इत्येवमेव लक्षणमभ्युपगम्यते तदाऽपि 'पर्वतः कालिकेन महानसीयत्वविशिष्टत्वे सति यः समवायेन वह्नित्वविशिष्टस्तद्वान्, धूमात्' - इत्यत्र समवायेन महानसीयत्वविशिष्टत्वे सति यः कालिकेन वह्नित्वविशिष्टस्तदभावमादायाऽव्याप्तिः स्यादिति प्रागेव प्रतिपादितम् । एवं स्वसामानाधिकरण्यादिसम्बन्धद्वितयमध्ये एकस्याप्यप्रवेशे भवत्येव उक्तस्थलेऽव्याप्तिरिति उभयसम्बन्धप्रवेशप्रयोजनविधया उक्ताऽव्याप्तिप्रदर्शनं ग्रन्थकृतः उचितम् एव, प्रत्येकसम्बन्धकृत्यजिज्ञासायामस्माभिः प्रदर्शितः पन्थाः अनुगन्तव्यः इति ।

●●●

॥ વિભાગવાર પૃષ્ઠ સૂચિ ॥

(ચૌદ વિભાગોમાં કયા વિભાગમાં કેટલા પૃષ્ઠો અને કેટલી દીધિતિઓ સમાવેશ પામી છે તેની સૂચિ અહીં પ્રસ્તુત કરાઈ છે.)

વિભાગ	દીધિતિ	પૃષ્ઠ
વિભાગ - ૧	૧ + ૨	૩૧૨
વિભાગ - ૨	૩	૬૪૪
વિભાગ - ૩	૪	૧૦૮૮
વિભાગ - ૪	૫	૧૩૯૬
વિભાગ - ૫	૫	૧૭૬૬
વિભાગ - ૬	૫	૨૦૯૪
વિભાગ - ૭	૫	૨૪૩૬
વિભાગ - ૮	૫	૨૭૮૨
વિભાગ - ૯	૫ + ૬	૩૧૦૨
વિભાગ - ૧૦	૬	૩૪૧૦
વિભાગ - ૧૧	૭	૩૭૪૬
વિભાગ - ૧૨	૭	૪૦૨૦
વિભાગ - ૧૩	૭ + ૮	૪૨૮૮
વિભાગ - ૧૪	૯ તથા પરિશિષ્ટ	૪૪૨૪ + પરિશિષ્ટ

ઊડાનની પરિસીમા
'GSLV' છે,
ઊંચાઈની પરિસીમા
'એવરેસ્ટ' છે,
ઊંડાઈની પરિસીમા
'પેસેફિક' છે,
તેમ વ્યાપ્તિના વિશ્વમાં
તર્કની ઊડાનની....
તર્કની ઊંચાઈની....
તર્કની ઊંડાઈની.....
પરિસીમા છે :

"ગૂઢાર્થતત્ત્વાલોક"

- प्रकाशक -
श्री दिव्यदर्शन ट्रस्ट

9 789382 019701

MULTY GRAPHICS
(022) 23873222 23884222